Chapter - 1

# प्रथम-परिच्छेदः

## परिचयात्मकः

i. पाणिनेः कृतित्वं व्यक्तित्वञ्च।

ii. आचार्यहेमचन्द्रस्य कृतित्वं व्यक्तित्वञ्च

(पृष्ठसंख्या-१ तः ३६ पर्यन्तम्)

# ।। मङ्गलाचरणम् ।।

यद्योगोल्लसिता वियोगरुदिता शोपाङ्गना आप्नुवन्
तत्वं वर्षशतैश्च तन्मुनिगणाः सप्तर्षयस्तापसाः।
भक्तिज्ञानविरागकूटपदिकाः मूलं पुनस्तं परमात्मानं
प्रणमामि मारमरणं मोहापहम् मोहनम्।।

येनेदं जगतो विषाददमनं मूर्त्या समाधिस्थया
सेवादैः प्रतिबोधितं सुविमलं ज्ञानं पवित्रं कृतम्।
संहारेण जगद्विरागसुकरं शं कामिनां प्राणिनामीशानं
प्रणमामि भावविधिना देवाधिदेवं शिवम्।।

दिव्या स्यादि..मालिका वितरति ज्ञानप्रकाशं भुवि,
वीजाकुम्भभवाः स्वराः श्रमहराः नन्दन्ति विश्वान्जनान्।
हस्तन्यस्त सुपुस्तकं जनगतं जाड्यं भिनत्ति द्रुतम्
भक्ताः प्राप्तकृपाः नमन्त्युदिनं मातः प्रसन्ना भव।।

यः सूत्राणि चतुर्दशान्धकरियोः प्राप्यायुधेषु प्रधीः
स्वग्रन्थे परिवर्तितानि सहसा सद्यः सहस्त्रेषु च।
निर्मूलं कृतवान् निहत्य नियमैः दुर्मार्षरक्षः कुलम्
तस्मै व्याकरणावतारमुनिने पाणिनिने वै नमः।।

हैमव्याकरणं हि शास्त्रविपिने पुष्पं भसद्गन्धवत्,
संसारोपरतः पुनर्हितकरः कार्य सतां निर्ममे।
नूत्नव्याकृतिकर्मकारणमहं स्याद्वाद् धारा रतं
नाना शास्त्र जलावगाहनमनं श्रीहेमचन्द्रं नुवे।।

॥ ॐ ॥

# प्रथमः परिच्छेदः

## ।। आ: पाणिनेः कृतित्वं व्यक्तित्वञ्च ।।

संस्कृतवाङ्मये यावन्तः प्राचीना आर्षवैयाकरणाः अभवन् तेषु सम्प्रति केवलं पाणिनीयव्याकृतिरेव साङ्गोपाङ्गरुपेण समुपलभ्यते। प्राचीनव्याकृतेरिदं निधिः वर्तते। अनेन देववाण्याः प्राचीन अर्वाचीनश्च सकलवाङ्मयम्पप्या रश्मिवत् देदीप्यमानमास्ते। अत्यन्तसौन्दर्यसम्पन्ना सुसम्बद्धा सूक्ष्मतमपदार्थानान्द्योतनाय पूर्ण-क्षमता राजत एतद्रचनायाम्। कृतिमेनामवलोकयन्तो मनीषिण अस्याः मुक्तकण्ठेन प्रशंसापरा भवन्ति। भारतीयप्राचीनाचार्याणां सूक्ष्मचिंन्तनस्य सुपरिपक्वज्ञानमत्राद्भूत-म्बिभ्राजते। प्रतिभाप्रकर्षमुपस्थापयितुमनुपमोयङ्ग्रन्थो वर्तते। कृत्यानया परङ्गैरन्विता देववाणी चकास्ति। विश्वस्मिन् विश्वे कश्याश्चनेतर-प्राचीनायाः भाषाया आहोश्वि-दर्वाचीनायाः भाषाया इदृशम्परिष्कृतव्याकरणमद्यावधि केनापि न निरमायि। इत्थ-म्भूतायाः दीव्यव्याकृतेः रचयिता सर्वजनसुपरिचितो महर्षिः पाणिनिरेवास्ति।

त्रिकाण्डशेषे पुरुषोत्तमदेवेन पाणिनेर्निम्नलिखितपर्यायाः प्रदत्ताः। (१) पाणिन (२) पाणिनिः (३) दाक्षीपुत्रः (४) शालङ्किः (५) शालातुरीयः अत्र पाणिनिनाम लोकविश्रुतम्वर्तते। पाणिनि शब्दस्यव्युत्पत्तिविषये शाब्दिकेषु मतद्वयमस्ति। (क) पणिन् शब्दाद् पणिनोऽपत्यम् अपत्ये अणि सति पाणिनः, पाणिनस्यापत्यं युवेति इञ् पाणिनिः। (ख) पणिन् नकारान्तस्य पर्याय पणिन अकारान्तः स्वतन्त्रशब्दोस्ति। तेन 'अत इञ्' (४/१/९५) इति सूत्रनियमात् पाणिनि-शब्द उपपन्नो भवति। पाणिनिकृते महर्षिपाणिनिशब्दोऽपि अस्यैव ज्ञापकः। तथा च पणिन्-नकारान्त-शब्दादपि 'बह्वादि०' (४/१/९६) आकृतिगणत्वेन इञ् प्रत्ययः सम्भवोऽस्ति।

मन्मतानुसारेण द्वितीयः पक्षः युक्ततरः प्रतीयते। यतो हि प्रकरणादिषु पाणिनः पाणिनिश्चेति नामद्वयं गोत्ररुपेण विश्रुतं वर्तते। प्रथममताश्रयणे पाणिनः गोत्रम् पाणिनिस्तु युवापत्यम् भविष्यति। यदि एवं स्यात् तर्हि युवप्रत्ययान्तस्यपाणिनिः गोत्ररुपेणोल्लेखो न स्यात्।

यदि पाणिनं पाणिनिं च यथाक्रमं गोत्रं युवाप्रत्ययान्तञ्च मन्यामहे तदापि प्राचीनव्यवहारानुसारं मातापित्रोर्जिवतोः सतोः एव युवा प्रत्ययान्तेन नाम्ना व्यवहारो भवति। तयोः स्वर्गगमनानन्तरं तु गोत्र-प्रत्ययान्तस्यैव प्रयोगो भवति न तु युवाप्रत्ययान्तस्य। एतद्धि प्रधानं कारणं वर्तते यत् एकस्यैव जनस्य युव-गोत्र प्रत्ययान्ते द्वे-द्वे नामनी प्राचीनग्रन्थेषु समुपलभ्येते यथा - कात्यायनः कात्यः इति।

**३ - पाणिनेयः**

अस्य नाम्नः प्रयोगः पाणिनीयशिक्षाया याजुष पाठे एव लभ्यते सोऽपि पाठान्तररुपेण। शिक्षा-प्रकाशाभिधायां टीकायामुक्तम् यत्–

'पाणिनेय इति पाठे शुभ्रादित्वं कल्प्यम्'।

अर्थात् - पाणिनेयः इति शब्दस्य निष्पत्तिः 'शुभ्रादिभ्यश्च' (४/१/१२३) इति सूत्रनिर्दिष्टं गण-माकृतिगणरुपेण स्वीकृत्य कर्त्तव्या।[१]

**४ - पणिपुत्रः**

अस्य पर्यायस्य प्राप्तिः यशस्तिलकचम्पूषु भवति।

**५ - दाक्षीपुत्रः**

अस्याः संज्ञायाः प्रयोगः महाभाष्ये[२], समुद्रगुप्तविरचितकृष्णचरिते[३]श्लोकात्मक-पाणिनीय-शिक्षायां[४] च लभ्यते।

**६ - शालङ्किः**

नामेदं पितृव्यपदेशजमस्तीति म.म.पं. शिवदत्त शर्मणां मतम्[५] पाणिनेः कृते अस्य पदस्य प्रयोगः कोशग्रन्थान् विहाय अन्यत्र कुत्रापि न दृष्टोऽस्माभिः। 'पैलादि

१. चकारोऽनुक्तसमुच्चयार्थं आकृतिगणतामस्यबोधयति गाङ्गेयः पाण्डवेय इत्येवमादि सिद्धं भवति। काशिका (४/१/१२३)

२. सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः १/१/२०

३. दाक्षीपुत्रवचोव्याख्यापटुर्मीमांसकाग्रणीः। मुनिकविवर्णनं श्लोक–१६।।

४. शङ्करः शाङ्करी प्रादाद् दाक्षीपुत्राय धीमते। मुनिकविवर्णनं श्लोक–५६।।

५. महाभाष्य नवाह्निक निर्णयसागर संस्क० भूमिका पृष्ठ–१४।

गणे' (२.४.५९) शालङ्किरिति पाठ सामर्थ्यात् शलङ्कुशब्दस्य शलङ्कादेश इञ् प्रत्ययश्च भवति।[१]

पैलादिगणपठितस्यशालङ्किपदस्य सम्बन्धः पाणिनिना सह अस्ति न वा इत्यस्मिन् विषये निश्चितं वक्तुं न शक्यतेऽस्माभिः अपि तु एतत्तु सुनिश्चितमेव यत् स प्राग्देशीयगोत्रं नासीत्।[२] महाभाष्यम् ४-१-९०, १६५ - शालङ्केः यूनः छात्राः शालङ्काः इति पाठ उपलभ्यते। अत्र शालङ्किपदम् अष्टाध्यायी २-४-५९ अनुसारेण शालङ्केः अपत्यस्य वाचकमस्ति। शालङ्केः अपत्यम् शालङ्कायनः भवति, शालङ्कायनस्यापत्यम् शालङ्कायनिः उच्यते इति काशकृत्स्नधातुपाठस्य टीकाकारस्य कवि चन्नवीरस्य कथनम्[३]। काशकृत्स्नधातुपाठे शलकि (ङ्क) स्वतन्त्रः धातुः पठितोऽस्ति[४]। शालङ्कायनप्रोक्त ग्रन्थस्याध्येतारः शालङ्कायनय इति निर्देशो लाट्यायनश्रौतेऽपि दृश्यते[५]।

शालङ्कायनगोत्रं कौशिकान्वयेऽपि वर्तते[६]। अस्य गोत्रस्य जनाः राजन्याः सन्ति[७]। काशिका (४-३-१२५) बाभ्रव्यशालङ्कायनिकाः इत्युदाहरणेन बाभ्रव्यशालङ्कायनानां विरोधः प्रदर्शितोऽस्ति। काशिका (६-२-३७) इत्यत्रापि 'बाभ्रवशालङ्कायना' इत्युदाहरणम्प्राप्यते। बाभ्रव्योऽपि कौशिकान्वयेऽस्ति[८] अतः

१. पैलादिपाठ एव ज्ञापक इञो भावस्य। काशिका ४/१/६६
२. अन्ये पैलादय इञन्तास्तेभ्यः 'इञः प्राचाम्' इति लुकि सिद्धेऽप्रागर्थः पाठः। काशिका २/४/५९
३. शलङ्कः – ब्रह्मणः पुत्रः। शालङ्किः – शलङ्कस्य पुत्रः।
शालङ्कायनः – शालङ्केपुत्रः। शालङ्कायनिः – शालङ्कायनस्यपुत्रः
(काश. धातुव्याख्यानम् १/४/९४)
४. काश० धातु० २/४४/९४।।
५. लाट्या० श्रौत ४/८/२०।।
६. शलङ्कु शलङ्कं चेत्यत्र पठ्यते.....गोत्र विशेषे कौशिके फकं स्मरन्ति। काशिका ४/१/९९।।
७. शालङ्कायना राजन्याः। काशिका ५/३/११०।।
८. मधुबभ्रवोर्ब्राह्मणकौशिकयोः। अष्टा० ४/१/१०६

अयं शालङ्कायनिः कौशिकः एव इति सम्भाव्यते। काशिका (५-१-५८) अत्र शालङ्कायनीनां त्रयो विभागा निर्दिष्टाः सन्ति[१]।

**७ - शा(सा)लातुरीयः**

पाणिनेरस्य नाम्नः सम्प्राप्ति र्वलभ्याः धृवसेन द्वितीयस्य सं.३१० ताम्रशासने[२], भामहस्य काव्यालङ्कारे[३], काशिकाविवरणपञ्जिकायां (न्यासे)[३] तथा गुणरत्नमहोदधि[४] इत्यादिषु ग्रन्थरत्नेषु भवति।

**८ - आह्निकः**

अस्य नाम्नः विषये वयं न किमपि जानीमः। प्रयोगश्चास्य कोशादन्यत्र कुत्रापि अस्माभि र्न लब्धः।

**वंशः**

पूर्वमेव वयमुक्तवन्तः यत् पं. शिवदत्तशर्माणः पाणिनेः शालङ्किः इति नाम पितृव्यपदेशजं मन्यन्ते तथा पाणिनेः पितृनाम शलङ्कः इति निर्दिशन्ति[५] गुणरत्नावल्यां योगेश्वर भट्टेनापि शालङ्केः पितुः नाम शलङ्को निर्दिष्टः। कैयट[६]-हरदत्त[७]-वर्धमानादयः[८] शालङ्केः[९] मूलं शलङ्कुः इति मन्यन्ते।

हरदत्तेन पाणिनिपदस्य व्युत्पत्तिरनेन प्रकारेण निर्दिष्टास्ति – (पणोऽस्यास्तीति पणी) पणिनोऽ-पत्यमित्यण् ..... (पाणिनः) पाणिनस्य अपत्यम्, पणिनः युवा

१. त्रिकाः शालङ्कायनाः। (२०४ पृ.)
२. राज्यसालातुरीयतन्त्रयोरुभयोरपि निष्णातः। (२०४ पृ.)
३. सालातुरीयपदमेतदनुक्रमेण /६/६२।।
४. शालातुरीयेण प्राक् ठञश्छ इति नोक्तम्। न्याय ५/१/१।। भाग २, पृ. ३
५. शालातुरीयस्तत्र भवान् पाणिनिः। पृ.१।।
६. भूमिका, महा.नव. निर्णयसागरसंस्क. पृष्ठ १४।।
७. महाभाष्य–प्रदीप ४/१/९०
८. पदमञ्जरी – २/४/५९
९. गणरत्नमहोदधि, पृ. ११५

इति इञ् (पाणिनिः)[1] इयमेव व्युत्पत्तिः कैयटादयोऽन्ये व्याख्यातारोऽपि स्वीकुर्वन्ति।

**वैयाकरणानां त्रुटिः**

उत्तरकालीनाः कैयटहरदत्तादयो वैयाकरणा सर्वे लक्षणैकचक्षुष्काः समभवन्। येनकेन प्रकारेण लक्षणानुसारेण शब्दसाधुत्वनिर्देशने प्रयत्नः कृतः। लक्ष्यं प्रति ते अलक्ष्या जाताः। पूर्वमेवोक्तमस्माभिर्यत् पाणिन-पाणिनि इति द्वे नाम्नी एकस्यैव जनस्य कृते प्रयुक्ते स्तः। एतस्याम् अवस्थायां पाणिनस्य पाणिनेः पितृत्वेन निर्देशः शास्त्रविरुद्धोऽस्ति। अपरमपि यं पाणिनिशब्दमेते युवाप्रत्ययान्तं मन्वते स तु गोत्रप्रवर प्रकरणे गोत्ररुपेण पठितोऽस्ति। अतः पाणिनेः पिता पाणिनः न अपि तु पणिन् एवास्ति तस्यैवापरं रुपमकारान्तः पणिनः विद्यते।

महर्षिपतञ्जलिर्महाभाष्ये (१-१-२०) सूत्रे पाणिनिं दाक्षीपुत्र इति नाम्ना स्मरति[2]। दाक्षी पदं गोत्रप्रत्ययान्तस्य दाक्षेः स्त्रीलिङ्गमस्ति। एतेन ज्ञायते यत् पाणिनेर्जननी दक्षकुलस्यासीत्।

## ।। पाणिनेः कालनिर्णयः ।।

**कालनिर्णयः**

भारतीयप्राचीनवाङ्मयस्य तथा तस्य प्रतिप्राचीन इतिहासस्याधिकाधिक-मर्वाचीनत्वं साधयितुं बद्धपरिकराः पाश्चात्यविद्वांसः पाणिनेः कालं सप्तमीं शती ईशा पूर्वात् चतुर्थी शती ईशा पूर्व पर्यन्तम् अर्थात् ६५७ वि. पूर्वात् २५८ वि. पूर्व पर्यन्तं मन्यन्ते। आद्या अवधिः गोल्डस्टुकरस्य अन्तिमा तु वैबर कीथयाः मतानुसारेण वर्तते। भारतीय प्राचीन इतिहासस्य विषये पाश्चात्य पक्षधराः, येषां मूलतो मितिः सिकन्दर-चन्द्रगुप्तमौर्ययोः समकालीनत्वेन स्वीकारोऽस्ति तां मितिमपरीक्षिकारकवत् अक्षिणी निमिल्य स्वीकर्तारः पाश्चात्यचक्षुष्का अधीताङ्ला अनेके भारतीय विद्वांसोऽपि

१. पदमञ्जरी १/१/७३, भाग-१, पृ. १४४

२. दाक्षीपुत्रस्य पाणिनेः। १/१/२०

आद्रियन्ते। पाणिनेः कालनिर्णय विषये पाश्चात्यविद्वांसस्तथा तेषां भारतीयानुयायिन यानि प्रमाणानि उल्लेखयन्ति तेषु एतानि प्रधानानि सन्ति–

१. आर्यमञ्जुश्रीमूलकल्पे-महापद्मनन्दस्य पाणिनिर्नाम माणवः सख्य आसीत् इति पाठो वर्तते[१]।

२. कथासरित्सागरे पाणिनिः महाराजनन्दस्य समकालिक उक्तोऽस्ति।

३. बौद्धभिक्षुकार्थं प्रयुञ्जानस्य श्रमणशब्दस्य निर्देशः 'कुमारः श्रमणादिभिः' (२-१-७०) पाणिनि सूत्रे प्राप्यते।

४. बुद्धकालिकाचार्यमङ्खलिगोसालार्थं प्रयुक्तं संस्कृत 'मस्करिन्' शब्दं पाणिनिः 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६-१-१५४) सूत्रेण साधयति।

५. सिकन्दरेण सह योयुध्यमानायाः तथा तम्पराजित्य प्रतिगमनार्थं विवशं कुर्वन्त्याः क्षुद्रकमालवानां सेनाया उल्लेखः पाणिनिना खण्डिकादिगण (४-२-४५) पठित 'क्षुद्रकमालवात् सेनासंज्ञायाम्' इति गणसूत्रे कृतोऽस्ति इति विदुषः बैवरस्य मतम्।

६. अष्टाध्यायी (४-१-४९) सूत्रे यवनः शब्दः पठितोऽस्ति। तमनुसृत्य पाश्चात्य विद्वान् कविः लिखति पाणिनिः सिकन्दरस्य भारतोपरि आक्रमणस्य पश्चादभूदिति।

७. राजशेखरः काव्यमीमांसायां यामनुश्रुतिम् उल्लेखयति तदनुसारं पाटलि पुत्रे शास्त्रकारपरीक्षाया-मुत्तीर्य वर्षोपवर्षौ पाणिनिपिङ्गलौ व्याडिः च ख्यातिमुपजग्मुः[२]। पाटलिपुत्रस्य निर्माणं महाराज उदयीः कुसुमपुरनाम्ना कृतवान्[३] एते सन्ति कतिपयाः प्रधानहेतवः यैः पाणिनिकालः चतुर्थीशतां ईशा पूर्व पर्यन्तः प्रस्थाप्यते।

---

१. तस्याप्यन्यतमः सख्यः पाणिनिर्नाम माणवः।

२. श्रूयते च पाटलिपुत्रे शास्त्रकार परीक्षा अत्रोपवर्षवर्षादि विह पाणिनि पिङ्गलाविह व्याडिः। वररूचि पतञ्जलि इह परीक्षिताः ख्यातिमुपजन्मुः। अ.१०, पृ.५५

३. वायुपुराण ९९/३१८

अधुना वयं संक्षेपेण एतान् हेतून् परीक्षिष्यामहे —

१) बौद्धग्रन्थानामध्ययनेनेदं विस्पष्टं प्रतीयते यत् - तदानीं काले विशिष्टनाम्नः स्थाने प्रायः गोत्रनाम्ना व्यवहारः प्रचलित आसीत्। वयमपि पूर्वमवोचाम यत् पाणिनिरपि गोत्रमिति। अतः मञ्जुश्रीमूलकल्पे कश्चिद् पाणिनिनामानं माणवं महापद्मस्य सरवारुपेण निरुपयति ग्रन्थकारः। तस्यैतादृशं कथनं विशिष्ट विशेषणात् विना वयं केन आधारेण जानीमो यत् तस्य ग्रन्थोक्तः पाणिनिरेवास्माकं शास्त्रकारः पाणिनिरस्तीति।

प्राचीनपरंपरायाः विज्ञप्तिं विना एतादृशीं स्वेच्छानुसारिणीं कल्पनामाधृत्य कतिपयविद्वांसस्तु बौद्धग्रन्थेषु गोत्रनाम्ना अभिहितान् आश्वलायनादीन् एव वैदिकवाङ्मयस्य नैकविधग्रन्थानां रचयितृरुपेण स्वीकर्तुं दुःसहन्ते। तद्विपरितम् बौद्धग्रन्थेषु बहुषु स्थलेषु तथागतबुद्धेन सह धर्मचर्चा कुर्वताम् वेदवेदाङ्गपारङ्गतानां विदुषां यद् वर्णनम् उपलभ्यते तदाश्रित्य वेदाङ्गानामस्तित्वं तथागतबुद्धकालात् सुदुरं पूर्वं स्थापयितुं शक्यते।

२) कथासरित्सागरस्य रचयिता अपि बौद्धकालिक गोत्रनाम्नः व्यवहरिण भ्रान्तिमापन्नः। अत एव स कथयति पाणिनिवररुची नन्दस्य समकालिकावास्तामिति। अस्य भ्रमस्य पुष्टिर्वार्तिककारं वररुचिं कौशाम्बीनगरनिवासी इति कथनेनापि भवति। उपप्रयागं कौशाम्बी अस्ति महर्षिपतञ्जलिः वार्तिककारं स्पष्टरुपेण दाक्षिणात्यं कथयति[१]। अनेन विरोधाभासेन स्पष्टं भवति यत् कथासरित्सागरस्य कथामाधृत्य कस्यापीतिहासस्य परिकल्पना नितान्तं चिन्तनीया एव।

अतोऽप्यधिकं पाश्चात्यैतिहासिकैस्तु महापद्मनन्दस्यापि कालः अत्यर्वाचीनरुपेण प्रस्था-पितोऽस्ति। भारतीयकालगणनानुसारं स कालः वि.सं.१५००-१६०० अब्द पूर्वः अस्ति।

३) यदि श्रमणशब्दस्य प्रयोगः बौद्धसाहित्ये एव स्यात् तथा तत्रापि केवलं बौद्ध

१. प्रियतद्धिता दाक्षिणात्याः। महा. २/२, आ० १।

परिव्राजकार्थमेव प्रयुक्तः स्यात् तदा तमनुसृत्य यथा कयाऽपि रीत्या पाणिनिं बौद्धकाले स्थापयितुम् शक्येत, परन्तु श्रमणोऽयं शब्दः तथागतबुद्धात् असंख्यवर्ष पूर्वकालिकेषु शतपथब्राह्मण १४/७/१/२२ तैत्तिरीय आरण्यक २/७/१ इत्यादिष्वपि उपलभ्यते। सर्वेऽपि व्याख्यातारः श्रमणशब्दस्य अर्थः परिव्राट् इत्येव कुर्वन्ति।

अष्टाध्यायी २-१-७० सूत्रे निर्दिष्टः कुमारशब्दो न बालवाचकः अपि तु अकृतविवाहस्य जनस्य वाचकोऽस्ति। यथा-वृद्धकुमारी[१] इत्यत्र कुमारी शब्दः अपरिणीता स्त्री इत्यस्य वाचकः। अतः कुमारश्रमणाः परिव्राजकाः ते उच्यन्ते ये बाल्यकाले एव संन्यासं स्वीकुर्वन्ति।

४) यदि 'तुष्यतु दुर्जनः' न्यायेन अष्टाध्याय्यां प्रयुक्तं मस्करी शब्द मंखलि शब्दस्य संस्कृतं रुपं स्वीकुर्मः तर्हि मस्करिन् शब्दे प्रयुक्तो मत्वर्थीय इन् प्रत्ययो निरर्थकः भविष्यति तथा न तस्य प्रधानेन वेणुवाचकमस्करशब्देन सह कोऽपि सम्बन्धः। एतद्धि न पर्याप्तं यदि पाणिनेः मतानुसारं मस्करीशब्दः मंखलीगोसालस्यैव वाचकः स्यात्तर्हि तदर्थार्थः परिव्राजक इति सामान्यपदनिर्देशः कथं कृतः पाणिनिना।

वस्तुतः मस्करीशब्दस्य सम्बन्धः वेणुवाचकेन मस्करशब्देन सह एवास्ति। अस्मादेव कारणात् पाणिनिपूर्ववर्तिना ऋक्तन्त्रकारेण-मस्करो वेणुः ४-७-६ सूत्रे मस्करशब्दो निर्दिष्टः तथा तेन एव मस्करीशब्दस्य गतार्थत्वं स्वीकृतम् पतञ्जलेः मा कृत कर्माणि[२] ६-१-१५४ व्याख्या मस्करी ग्रहणस्य आनर्थक्यस्य[३] प्रत्याख्यानाय प्रौढिवादमात्रमेव। यदि इमां व्याख्यां प्रामाणिकीमपि मन्यामहे तदा अपि मस्करी शब्दस्य मूलं वेणुवाचकेन

१. वृद्धकुमारी-न्याय, महाभाष्य ८/२/३३।।

२. माकृत कर्माणि शान्तिर्वः श्रेयसी। महाभाष्य ६/१/१५४।।

३. मस्करिग्रहणं शक्यमकर्तुम्। कथं मस्करी परिव्राजक इति? इतिनैतन्मत्वर्थीयेन सिद्धम्। मस्करोऽस्यास्तीति मस्करी। महाभाष्य ६/१/१५४।

मस्करशब्देन सह एव भविष्यति। तस्य अर्थोऽपि 'मा क्रियतेऽनेनेति[1]' भवति। येन अनर्थकर्माणि निषिध्यन्ते स मस्करः वेणुः अर्थात् दण्डः इति। तथा एतदेव निर्वचनं स्वीकृत्य मा कर - मस्कर इत्यत्र पाणिनिना सुडागमः विहितोऽस्ति। वस्तुतः मस्कर-मस्करी द्वौ अपि मस्क-गतौ इत्यस्माद्धातोर्निष्पन्नौ स्तः[2]।

वस्तुतस्तु मस्करीशब्दस्य मंखली शब्दस्य संस्कृतरुपेण स्वीकार एव भ्रान्तिमूलकोऽस्ति। महाभारतनिर्दिष्टमङ्किऋषेः कुले जायमानत्वात् मङ्किलस्य मङ्खलिपरपभ्रंशो जातः। अत एव भगवतीसूत्र (१५) इत्यादिषु मङ्खलिं मङ्खस्य पुत्रं कथयितुम्[3] युक्तम्। जैनागमेषु गोसालः मङ्खलिपुत्तोऽपि कथितोऽस्ति।[4]

५) वैबरमतस्यालोचनां तु पाश्चात्यमतानुगामी डो. वासुदेवशरणः अग्रवालः स्वयमेव सुचारुरुपेण करोति। अतः तस्य विवरणम् - 'पाणिनिकालीन भारतवर्ष' पृष्ठ-४७६ इत्यत्र द्रष्टव्यम्। अत्र पुनर्लेखनं पिष्टपेषणमेव इति हेतोर्न लिख्यते।

६) 'यवनानी' शब्दं विस्पष्टयन् डो. वासुदेवशरण अग्रवालोऽपि लिखति यत् सिकन्दरस्य आक्रमणात् पूर्वमपि भारतीयाः यवनजात्याः सुपरिचिताः आसन्[5]। यवनजाति विषये वयमपि स्वमतं स्थापयितुमिच्छामः यत् जातिरियम् मूलतोऽभारतीया नास्ति। यवनाः महाराजस्य ययातेः पुत्रस्य वंशजाः सन्ति। महाभारते आदिपर्वणि स्पष्टं लिखितं वर्तते यत्—

---

१. क्षीरस्वामी, अमरटीका २/४/१६०

२. मस्क + बाहुलकाद् अरः। शब्दकल्पद्रुम, भाग ३, पृ. ६५१। तथा 'अरिनि' प्रत्यय मस्करिन्। यद्वा-मस्कते इति मस्कः, अच्। तस्मान्मत्वर्थीयो रः, मस्करः पुनस्तस्मान्मत्वर्थीय इति मस्करिन्।

३. पाणिनिकालीन भारतवर्ष, पृ. ३७६।

४. पाणिनिकालीन भारतवर्ष, पृ. ४०५-४७६।

'यदोस्तु यादवाजातास्तुर्बसोस्तु यवनाः स्मृताः[१]'

अस्य तुर्बसोः बृहत्तरा सन्ततिः पश्चिमोत्तरायां दिशि वसति स्म। ब्राह्मणानाम् अदर्शनात् धार्मिक-क्रियायाः विध्वंसनाच्च म्लेच्छ नाम्ना ख्यातिमापन्ना। पश्चिमोत्तरायाः दिशः प्रवासं कृत्वा यवनाः पश्चिमायां दिशि गताः। तथा तेन कारणेन तस्य देशस्य नामापि यवन - यूनान इति जातम्।

इदमैतिहासिकतथ्यमस्वीकृत्य कस्मिन्नपि प्राचीन ग्रन्थे केवलं 'यवन' शब्दप्रयोगाधारेण तस्य निर्माणं सिकन्दरस्याक्रमणस्य पश्चात् जातमिति कथनं दुराग्रहपूर्वकमेव प्रतीयते।

७) अधुना अवशिष्टाऽस्ति राजशेखरोद्धृता अनुश्रुतिः। अनुश्रुतिः इतिहासे तावत्पर्यन्तमेव प्रमाणी-क्रियते यावत् तस्याः प्रत्यक्षेण बलवत्प्रमाणेन सह विरोधो न स्यात्। विरोधे सति अनुश्रुतिः केवलमनुश्रुतिरेव न प्रमाणम् अत्रेदमववधेयं यत् राजशखरोऽत्यर्वाचीनो ग्रन्थकारोऽस्ति। तस्यकाल पर्यन्तं तु अनुश्रुते रुपस्यैव परिवर्तनं जातम्। राजशेखरस्य कथनानुसारं तु पतञ्जलिरपि पाणिनेः समकालीनः भवति। अतः राजशेखरस्य अनुश्रुतिः अंप्रमाणमेव।

डो. वासुदेवशरण अग्रवालः पाणिनिकालीन भारतवर्षेगोल्डस्टूक-रादीनां मतानां प्रत्याख्यानं कृत्वा पाणिनिकालं नन्दस्य काले (ईशा पूर्व चतुर्थीशती) मन्यते। अधुना तस्य विवेचनं कुर्मः।

(१) पूर्वं तावत् वयं तानि प्रमाणानि ग्रहीष्यामः येषां निर्देशः स्वमतविरुद्धत्वात् पाश्चात्यविद्वद्भिस्त-दनुयायिभिश्च जानन्नपि नोपस्थापितः। यथा—'निर्वाणोऽवाते' (पा. ८/२/५०) सूत्रोक्तं निर्वाणः इति पदम्। वैयाकरणा उदाहरन्ति निर्वाणः अग्निः, निर्वाणः प्रदीपः, निर्वाणो भिक्षुः। अत्र निर्वाणः इति पदस्यार्थो भवति-शमनम्, अस्त गमनम्, मरणम् इति।

१. आदिपर्व १३६/२।।, कुम्भघोण संस्करण।

पाश्चात्यमतानुसारं यदि पाणिनिः तथागतबुद्धात् उत्तरकालीनः स्यात् तदा बौद्धसाहित्ये निर्वाणशब्दस्य प्रसिद्धोऽर्थः मोक्षः भवति तस्य उल्लेखमवश्यमेवाकरिष्यत्। यः पाणिनिः मङ्कलि गोसालस्य व्यक्तिविशेषस्य कृते मस्करीन् शब्दस्य उल्लेखं कर्तुं शक्नोति (पाश्चात्यमतानुसारं) स-पाणिनिः बौद्धसाहित्ये प्रसिद्धतमस्य निर्वाणपदस्य अर्थनिर्देशं न कुर्यात् इदमसम्भवम्। अतः पाणिनिना बौद्धसाहित्यप्रसिद्धनिर्वाणपदस्यार्थनिर्देशः न कृतः तस्माद्धेतोः पाश्चात्यसरण्यनुसारं हि एतत्सिद्धं भवति यत्-पाणिनिः तथागत बुद्धात् पूर्ववर्ती एव नतूत्तरवर्ती।

कालविवेचने बाह्यसाक्ष्याणां महत्त्वपूर्णं स्थानं भवति, तथापि अन्तःसाक्ष्याणां महत्त्वं सर्वोपरि एव भवति तथा बाह्यान्तःसाक्ष्ययोर्मध्ये यदा विरोधो भवति एतस्यामवस्थायां तु अन्तः साक्ष्यं प्रबलतरम् जायते। यदाह-'अन्तरङ्गं बलीयो भवति' अतोऽहं पाणिनिकालनिर्णये अन्तः साक्ष्यमुपस्थापयामि।

**अन्तः साक्ष्यम्**

अधुना पाणिनिकालविवेचनार्थं वयं पाणिन्यष्टाध्याय्याः तेषामन्तः साक्ष्याणामुद्धरणं करिष्यामो येषां निर्देशः एतावत्पर्यन्तं केनापि विदुषा न कृतः यथा–

(२) इदं सर्ववादिसम्मतमस्ति यत् तथागतबुद्धस्यकाले संस्कृतभाषा जनसाधारणस्य भाषा नासीत्। तस्मिन् काले जनसाधारणेषु पालि-प्राकृतेत्यादिका भाषा व्यवहृता आसन्। अत एव बुद्ध-महावीरादयः स्वमतप्रचारार्थं संस्कृतं विहाय पालिप्राकृतादिभाषाणामाश्रयणं कृतवन्तः। तद्विपरितं पाणिन्यष्टाध्याय्यां शतशः एतादृशाः शब्दा लभ्यन्ते ये नितान्तं जनसाधारणव्यवहारोपयोगिनः सन्ति। यथा (क)मूलक, पालकी, धान्यकम्, अजगन्धः इत्यादीनां संव्यवहारार्थं प्रयुक्ता मूलकपणः शाकपणः इत्यादयः। एषां शब्दानां सिद्ध्यर्थं 'नित्यं पणः परिमाणे'

(३/३/६६) इत्यष्टाध्याय्यां सूत्रं वर्तते। एतत्सूत्रोक्तशब्दाः विशुद्धाः जनसाधारणोपयोगिनः सन्ति न तु साहित्यादिषु प्रयुक्ताः।

(ख) रजकानां व्यवहारार्थं प्रयुक्तानां - माञ्जिष्ठम्, काषायम्, लाक्षिकम् इत्यादिकानां सिद्धयर्थं पाणिनिः 'तेन रक्तं रगात्' लाक्षारोचनाट्ठक् (४-२-१,२) सूत्रे पठति।

(ग) पाचकानां (पूर्वकाले ये शुद्राः एव आसन्[1]) व्यवहारार्थं प्रयुक्तानाम् दाधिकम्, औदश्वित्कम्, लवणः सूपः इत्यादीनां सिद्धयर्थं पाणिनिना ४/२/१६-२०, एवं ४/४/२२-२६, दश सूत्राणि विरचितानि।

(घ) कृषीवलानां व्यवहारार्थं क्षेत्रवाचिनाम् प्रैयङ्गवीन्, व्रैहेयम्, द्रव्यम्, तिल्यम्, तैलीनम् इत्यादिशब्दानां प्रयोगार्थं ५/२/१-४ चत्वारि सूत्राणि उपदिष्टानि।

(च) शुद्राणाम् अभिवादन प्रत्यभिवादनाचाराः ८/२/८२ सूत्रे निर्दिष्टाः सन्ति।

एभिः तथा एतादृशैरनेकैरन्यैरपि प्रमाणैर्विज्ञायते यत् पाणिनि काले संस्कृतभाषा लोक-व्यवहार्या आसीत्। जनसाधारणेषु अपीयं प्रचलिता आसीत्।

**कीथस्य सत्योक्तिः**

स्वकीय 'संस्कृत साहित्य इतिहास' नामक ग्रन्थे अष्टाध्याय्यां प्रयुक्तान् उपर्युक्तप्रयोगान् निर्दिश्य प्रो. कीथेन स्वीकृतं यत् पाणिनिकाले संस्कृतभाषा व्यावहारिकी भाषा आसीत्।

(३) पाणिन्यष्टाध्याय्या तु एतदपि अवज्ञायते यत् तस्मिन् काले इयं न केवलं लोकभाषारुपेण प्रचलिता अपि तु जनाः वैदिक शब्दवत् उदात्तानुदात्तस्वरित-स्वराणामपि यथावत् प्रयोगान् कुर्वन्ति स्म। यथा– क - 'विभाषा भाषायाम्' ६/२/८१ - एतत्सूत्रानुसारं भाषा - लौकिक संस्कृतस्य पञ्चभिः सप्तभिः तिसृभिः चतसृभिः इत्यादिप्रयोगेषु विभक्तेः तथा विभक्तेः पूर्ववर्ती उपोत्तमः अच् विकल्पेन उदात्तः भवति। यथा - पञ्चभिः, सप्तभिः।

१. आर्याधिष्ठिता वा शूद्राः संस्कर्तारः स्युः। आपस्तम्ब धर्म. २/२/४।।

'उदक् च विपाशः' (४/२/७४) अनेन सूत्रेण विपाशः - व्यासनद्युत्तरकूलकूप-प्रवृतिनिमित्तकरुपोदात्तः गौप्तः इति प्रयोगसम्पादनाय अञ् प्रत्ययविधानं पाणिनिना विहितम्। दक्षिणकूलबोधाय अपि दात्तः, गौप्तः इत्यादिपदानि प्रयुज्यन्ते, परन्तु! अत्र अण् प्रत्ययविधानं भवति। अञणोः प्रत्ययविधानं भवति। अञणोः प्रत्ययविधानं स्वरभेदप्रकारेणैव कृतम्। उत्तरकूलदात्तः गौप्तः इति प्रयोगौ आद्युदात्तौ प्रयुज्येते स्म, अतः तदर्थं पाणिनिः अञ् प्रत्ययस्य एवञ्च दक्षिणकुलाय दात्तः गौप्तः अन्तोदात्ताः भाषायां प्रचलिता आसन् तदर्थम् अण् प्रत्ययस्य विधानमकरोत्।

यदि पाणिनिकाले उदात्तादिस्वरप्रयोगः आपामरसाधारणं न स्यात् तर्हि यथार्थोच्चारणमपि व्यवहारविषयः न स्यात्। तदानीं व्यवहारविषयत्वादेव तस्य सूत्रे स्वरविशेषस्य[१] संग्रहोपलब्धि र्जाता। अतीते च काले प्राकृतभाषायां तयोरप्रयोगे जाते तदानीन्तनवैयाकरणैः स्वरविशेषदृष्टिसम्पादितपाणिनिप्रयुक्ते अणञ्प्रत्यये तदीयव्याकरणाद् अपसारिते।

स्वरमीमांसाग्रन्थे 'स्वरस्य लोपप्रकरणे' एतदभिहितं यत् कृष्णद्वैपायनीयशिष्यीय-शाखाप्रवचनकाले स्वरोच्चारणे किञ्चिच्छैथिल्यमुपागतम्[२]। अतः प्राकृतभाषायां व्यवह्रियमाणस्वराणां पूर्वोक्तरीत्या सूक्ष्मदृष्ट्या विवेचनकर्तृणामाचार्यपाणिनिनां कालः अन्त्यशाखाप्रवचनकालात् सन्निहितमेव भवेत्। संभवतः अन्त्यशाखा-प्रवचनकालः महाभारतयुद्धात् (३१०० वि.सं पूर्वतः) १०० वर्षोत्तरं यावद् विधत्ते। अतः पाणिनेः समयः महाभारतसंग्रामतः २०० वर्षेभ्यः अधिकः अर्वाचीनः न सम्भवति।

पाणिनिकालनिर्णायकसूत्रोऽयं विद्यते - 'योगप्रमाणे च तदभावेऽदर्शनं न स्यात्' (१/२/५५)।

१. 'स्वरे विशेषः। महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य। काशिका' ४/२/७४
२. 'वैदिकस्वर'. पृष्ठ ५१, ५२ द्वि. सं.।
३. 'कृष्णद्वैपायनव्यासेन भारतयुद्धं सर्वक्षत्रान्तकृत् शब्देनाभिहितः'।

अस्य सूत्रस्य अभिप्रायोऽयं वर्तते यदि पाञ्चालाः, अङ्गाः, वाङ्गाः, मगधाः इत्यादिदेशवाचकानां प्रवृतिनिमित्ताः पाञ्चालवाङ्गमगधसंसकाः क्षत्रियाः सन्ति, अर्थात् एतादृग्नाम्नां क्षत्रियाणां निवासस्थानभूतत्वेन तेषां प्रदेशाणामेतानि नामानि विख्यातानि यदि इत्थं प्राचीनाचार्याणामभिमतमङ्गीक्रियते चेत् एतन्नाम्नां क्षत्रियाणां तत्र अभावे जाते सति तेषां क्षत्रियाणां निवासस्थानत्वेन व्यवह्रियमाणानां प्रदेशानां तत्तन्नाम्नां व्यवहारविलोपापत्तिः स्यात्। यतः तत्तन्नाम्नां क्षत्रियाणां तत्रत्यदेशेषु सम्बन्धविरहो जातः तदा तत्तत्सम्बन्ध-निमित्तकशब्दानां प्रयोगोऽपि न स्यात्। तथापि तत्तनाम्नां क्षत्रियाणां नाशे जातेऽपि तेषां प्रदेशाणां तैरेव नामभिः लोके व्यवहारोपलभ्यते। अतो देशवाचिशब्दाः न तत्तन्नामकाणां क्षत्रियाणां निवासस्थानवाचकाः इति मन्तव्यम् परन्तु एते रूढशब्दाः इति मन्तव्यम्।

वस्तुतस्तु पाणिनिना भारतीयैतिह्यं प्राचीनव्याकरणञ्चाभिलक्ष्य स्वकीयसूत्रे तत्तन्नामकाणां क्षत्रियाणां वंशानां निवासस्थानभूतत्वेनख्यातिमापन्नानां पाञ्चालादिप्रदेशाणामभिधानं विहितम्। पाणिनेः कथनानुसारेणेदं चिन्त्यं यद् भारतीयैतिह्ये कदा क्षत्रियाणां बाहूल्येनोन्मूलनं जातम्। इतिहासावलोकनेनेदं निर्णीयते यद् वारत्रयं क्षत्रियाणामामूलनाशो जातः। आदौ दाशरथिपूर्वं परशुरामेण क्षत्रियवंशनाशः। द्वितीये सर्वक्षत्रान्त-कृत्नन्देन[१] क्षत्रियवंशनाशः सम्पादितः।

आदिमस्तु न पाणिनिनाभिलक्षितः ततः पूर्वमेव तद्युद्धस्यजातत्वात् अत एव न द्वितीयः परन्तु तृतीयः कालः सर्वक्षत्रान्तकृत्नाशः कालः समकाल एव पाणिनिकालः सम्भवति। अस्मिन्नेवकाले डा. वासुदेवशरण अग्रवालः पाणिनेः विद्यमानतामङ्गीकरोति। अत्रेदं चिन्तनीयं यद् पाणिनिकाले एव नन्देन पाञ्चालादिक्षत्रियाः नाशिताः? यदि कृतचेद् तस्मिन् तस्मिन् काले उक्तसूत्रनिबन्धनं न सम्भवति। यतः क्षत्रियाणां विनाशकाले एव 'तस्य निवासः' आदिसम्बन्धज्ञानाभावः न सम्भवति। तादृक् सम्बन्धज्ञानाभावाय न्यूनातिन्यूनं शतद्वयोः शतत्रयाणां कालः अपेक्षितः। येन पाञ्चालादिदेशोत्पन्नानां क्षत्रियाणां तैः देशैः सह 'तस्य निवासः' रुपसम्बन्धाज्ञानाभावः भवेत्। इत्थं च नन्दात् न्यूनातिन्यूनं २०० वर्षोत्तरं पाणिनेः

१. 'नन्दोऽपि ऐतिह्ये सर्वक्षत्रियान्तकृत् स्वीकृतः'।

कालः निर्णेतुं शक्यते। इदं च स्वीक्रियमाणे पाश्चात्यैः निर्मीतः ऐतिह्यप्रासादं भज्येत। अतः सः कालः अपि न ते स्वीकर्तुं प्रभवन्ति। पूर्वोक्तानुसारेण पाणिनीयाष्टाध्यायिरीत्या तेषां काले संस्कृतमेवापमरसाधारणभाषाऽऽसीत्।
नन्दस्य तदुत्तरं च काले पाणिनिपरिभाषितसंस्कृतस्य तादृशीस्थितिः नासीत्। तदानीं जनसाधारणेषु प्राकृतम् एव प्रचलितं जातम्। अतः पाणिनिः न नन्दसमकालिकः इति निर्णीयते। यदि च बलादिदमङ्गीक्रियते चेत् पाणिनेः अन्तः साक्ष्येन सह महान् विरोधः स्यात्।

द्वितीयश्च क्षत्रनाशः महाभारते जातः। तद्रीत्या भारतयुद्धानन्तरं २००-३०० वर्षेषु पाणिनेः कालः निर्णेतुं शक्यते। भारतयुद्धानन्तरं सम्भवतः, २५० वर्षोत्तरं पाञ्चालादिक्षत्रियाः पुनः प्रबलाः इतिहासे दृश्यते। अतः पाणिनेः कालः महाभारतयुद्धात् २०० वर्षाणि पश्चात् अर्वाचीनः न भवितुमर्हति। पाणिनीयशास्त्रे निर्दिष्टान्तः साक्ष्यैरपि अयमेवकालः पाणिनेः निर्णेतुं शक्यते। तदानीन्तनकाले चेदं संस्कृतजनसाधारणं स्वराणामुदातादिप्रयोगालङ्कृतं चासीत्। तदनन्तरञ्चेदं यथाकालं दूषितं प्राकृतादिभिः। सम्प्रति प्राचीनवाङ्-मयातादृशप्रमाणानि उपस्थाप्यन्ते यैः पाणिनेः कालनिर्णयः स्फुटः स्यात्। पाणिनेः समवत्याचार्यः १. गृहपतिः शौनकः ऋक्प्रातिशाख्यः[१] तथा बृहद्देवतायां[२] यास्कः च बहुधा उद्धृयते। २. पाणिनेः अनुजः पिङ्गलः 'उरोबृहती यास्कस्य[३]' सूत्रे यास्कं स्मरति। ३. यास्कनिरुक्तम् १/५ अत्र कौत्सः उल्लिख्यते। महाभाष्यं ३/२/१०८ एतद् रीत्या कौत्सः पाणिनेः शिष्य आसीत्[४]। ४. यास्केन स्वकीयायां तैत्तिरीया-नुक्रमणिकायां ऋक्प्रातिशाख्यप्रवक्ता शौनकः निरुप्यते[५]। ५. पिङ्गलस्य नाम पाणिनीयगणपाठे ४/१/९९, १०५ लभ्यते। ६. पाणिनिना 'शौनकादिभ्यश्छन्दसि'[६] सूत्रे शाखाप्रवक्ता

---

१. न दाशतय्येकपदा काचिदस्तीति वै यास्कः। १७/४२।।
२. बृहद्देवता १/२६।। २/१११, १२२, १३७।। ३/७६, १००, ११२ इत्यादि
३. 'छन्दःशा'. ३/३०।।
४. 'उपसेदिवान् कौत्सः पाणिनिम्'।
५. 'द्वादशिनस्त्रयोऽष्टाक्षरांश्च जगती जोतिष्मती। सापि त्रिष्टुबिति शौनकः'। वैदिकता०, वेदानां भाष्यकार- 'संज्ञकभाग, पृष्ठ २०५ उद्धृतः। सादृश्यं कुरु ऋक्प्रातिशाख्य १३/७०।।
६. 'अष्टा'० ४/३/१०६।।

शौनकः उल्लिखितः। ७. शौनकशाखाप्रवक्ता गृहपतिशौनकः[1] ऋक्प्रातिशाख्यीयनिकेषु सूत्रेषु व्याडिः निर्दिश्यते[2]। व्याडिरेव दाक्षायणः। स च पाणिनेः मातुल आसीत्। इदं पूर्वं (पृष्ठे–२०६) उल्लिखितम्। ८. व्याडिनाम पाणिनीय गणपाठे ४/१/८० इत्यत्र, तथा दाक्षायणनाम गणपाठे ४/२/५४ इत्यत्र लभ्यते। ९. सामवेदीयलघुतन्त्र-न्याकरणे पाणिनेः सस्वरुपमेवोल्लेखः[3]। १०. बौधायनश्रौतसूत्र-प्रवराध्याये(३) अत्र पाणिनेः उल्लेखः। यथा–भृगूणामेवादितो व्याख्यास्याम पैङ्गलायना[4] वैहीनरयः। ११. मत्स्यपुराणे १९७/१० अत्र पाणिनिगोत्रोल्लेखः[5]। १२. वायुपुराणे ९१/९९ अत्र पाणिनिगौत्रः निर्दिष्टः[6]। पाणिनः पाणिनि एवेति पूर्वमेवोल्लिखितम्[7]। १३. ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे अ.४ श्लोक ६७ अत्र पाणिनिः साक्षात् ग्रन्थकारः उक्तः[8]।

## ।। मातृबन्धः ।।

संग्रहकारस्य व्याडिनः एवापरं नाम दाक्षायण अस्ति[1]। परन्तु काशिकायां ६/२/६९ इत्यत्र कुमारीदाक्षाः इत्युदाहरणे दाक्षायण एव दाक्षीतिनाम्ना स्मृतः। अतः प्राचीनपद्धत्या दाक्षिरेव दाक्षायणः स एव च संग्रहकारव्याडिरस्ति। अत एव

१. ‘मुण्डकोपनिषदि १/१/३ अत्र शौनकः महाशालः इत्युक्तम्। शङ्करेणास्यार्थः महागृहस्थः कृतः। तच्चिन्त्यम्। महाशालेत्यस्य महतीपाठशाला यस्येति अर्थो लभ्यते। भरणपौषणपूर्वकं दशसहस्रछात्राध्यापकः गृहपतिः इति धर्मशास्त्रम्’।

२. ‘ऋक्प्राति’. २/२३, २८।। ६/४३।।१३।। ३६।।

३. ‘एचोवृद्धिरिति प्रोक्तं पाणिनीयानुसारिभि’:। पृष्ठ ४६।

४. ‘पैङ्गलायनप्रोक्तब्राह्मणबौधायनश्रौत’ १/७ अत्र उद्धृतः।

५. ‘पाणिनिश्चैवत्र्यार्षेयाः सर्व एते प्रकीर्तिताः’।।

६. ‘बभ्रवः पाणिनिश्चैव धानजव्यास्तथैव च’। अत्र ‘धानञ्जयास्तथैव’ शुद्धपाठः।

७. ‘पूर्व’


८. ‘कणादौ गौतमः कण्वः पाणिनिः शाकटायनः’। ग्रन्थं चकार ...........।

---

१. ‘शोभना खलु दाक्षयणस्य संग्रहस्य कृतिः’। महा. २/३/६६।।

व्याडिः पाणिनेः मातुः भ्राता तस्य च मातुलः एवास्तीति निश्चयः। व्याडिपदीयक्रौड्यादिगणे (४/१/८०) अत्र पठ्यते। तद्रीत्या व्याडिनेः भगिनी दाक्षिण्याः नाम व्याड्यपि अस्ति। पाणिनिजनन्याः कृते अन्यत्र व्याड्येति नाम्नः प्रयोगः नोपलभ्यते। अनेनैवनामपरम्परया पाणिनेः मातामहस्यार्थात् दाक्षिपितुः नाम व्यड त्रासीत्। कात्यायनीय ऋक्सर्वानुक्रमण्याः वृत्तिकारेण षड्गुरुशिष्येणवेदार्थदीपिकायां छन्दःशास्त्रप्रवक्तापिङ्गलः पाणिनेः अनुजः इति उक्तम्[१]। श्लोकात्मकपाणिनीयशिक्षायाः प्रकाशटीकाया रचयितुः अपि इदमेवमतमस्ति[२]।

इत्थं रीत्या पाणिनेर्वंशचित्रमेतादृशं भवति–




## ।। आचार्यः ।।

पाणिनिना स्वकीयशब्दानुशासने स्थानद्वये बहुवचनान्ताचार्यपदे प्रयुक्ते[३], हरदत्तमतेन पाणिनिना बहुवचनान्ताचार्यपदप्रयोगः आत्मनः गुरोः बोधाय कृतः[४]। ऐतरेय आरण्यके[५], शांखायन–

१. 'तथा च सूत्र्यते भगवता पिङ्गलेन पाणिन्यनुजेन 'क्वचिन्नवकाश्चत्दारः' (पिङ्गलसुत्र ३/३३) इति परिभाषा' पृष्ठ ७९।। (द्र. रामलाल कपूर ट्रस्ट संग्रह पृ.२६)।

२. 'ज्येष्ठभातृभिर्विहितो व्याकरणेऽनुजस्तत्र भगवान् पिङ्गलाचार्यस्तन्मतमनुभाव्य शिक्षां वक्तुं प्रतिजानीते। शिक्षासंग्रह काशीसंस्करण' ३८५।

३. 'अष्टा'. ७/३/४९।। २/४/५२।।

४. 'आचार्यस्य पाणिनेर्य आचार्यः स इहाचार्यः, गुरुत्वाद्बहुवचनम्' पद. ७/३/४९, भाग २, पृष्ठ ८२१।

५. '३/२/६।। ४- नान्तेवासिने ब्रूयात् .....ना प्रवक्त्र इत्याचार्याः'।

आरण्यके[१] हारीतधर्मसूत्रे[२], यास्कीयनिरुक्ते[३], तैतिरीयप्रातिशाख्ये[४], ऋक्तन्त्रे[५] पातञ्जलमहाभाष्ये[६], कौटिल्य-अर्थशास्त्रे[७], वात्स्यायनकामसूत्रे[८] कामन्द[९]कीयनीतिसारादिषु बहुवचनान्ताचार्यपदप्रयोगाः बाहुल्येन लभ्यन्ते। किन्तु तदाचार्यपदं तदीयगुरुबोधकमित्यत्र संशयः। महाभाष्ये एकत्र कात्यायनार्थकम् उभयत्र पाणिन्यर्थकम् बहुवचनान्तमाचार्यपदं प्रयुक्तम्[१०]। कथासरित्सागरादिरीत्या पाणिनेर्गुरोः वर्ष आसीत्[११]। वर्षानुजः उपवर्ष बभूव। एकश्चोपवर्षः जैमिनीयसूत्रवृत्तिकारी बभूव[१२]। एकश्चोपवर्षः चर्मशास्त्रेषु स्मृतः[१३]।

---

१. 'आहारशुद्धौ सत्त्वशुद्धिरित्याचार्याः। उद्धृतकृत्यकल्पतरु, ब्रह्मचारीकाण्ड', पृष्ठ ११९।

२. 'मध्यममित्याचार्याः' ७/२२।।

३. 'आदिरस्योदात्त सम इत्याचार्याः' १/४६

४. 'वायुं प्रकृतिमाचार्याः' पृष्ठ १।

५. 'नेह्याचार्याः सूत्राणि कृत्वा निवर्तयन्ति। १/१ आ. १।। तदेतदत्यन्त सन्दिग्धं वर्तते आचार्याणाम्। १/१। आ.२। इहेङ्गितेन चेष्टितेन महता वा सूत्रप्रबन्धेननाचार्याणामभिप्रायो लक्ष्यते'। ६/१/३७। ८/२/३।।

६. १/४।। २/९।। ३/४, ५, ७ इत्यादि ३६ स्थानेषु।

७. १/२/२१।। १/३/७ इत्यादिदशस्थानेषु।

८. ८/५८।।

९. द्र. पूर्व पृ.२१० टि.११

१०. 'अथकालेन वर्षस्य शिष्यवर्गो महानभूत्। तत्रैकः पाणिनिनाम जडबुद्धितरोऽभवत्'। कथा. लम्बक १, तरङ्गः ४, श्लोकः २०।

११. शाबरभा. १/१/५।। केशव, कौशिकसूत्रटीका, पृष्ठे ३०७। सायण, आथर्वभाष्योपोद्घाते, पृष्ठे ३५ पृष्ठे। प्रपञ्चहृदये ३८ पृष्ठे।

१२. तथा च प्रवरमञ्जरीकारः शिष्टसम्मतिमाह - 'शुद्धाङ्गिरी गर्गमये कपयः पठिता अपि। आचार्यैरुपवर्षाद्यैर्भरद्वाजाः स्युरेव ते। द्विविचानपिगर्गांस्तानुपवर्षो महामुनिः। अनुक्रम्य त्वर्वेवाहयान् भरद्वाजतया जगौ'। वीरमित्रोदय, संस्कारप्रकाशः ६१३, ६१४ पृष्ठे उद्धृतः।

# ।। पाणिनिशिष्याः ।।

पातञ्जलमहाभाष्ये ३/२/१०८ अत्र एकस्मिन्नुदाहरणे 'उपसेदिवान् कौत्सः पाणिनिम्' इति लभ्यते। अस्मिन्नैवसूत्रे काशिकावृत्तौ उदाहरणद्वयं लभ्यते–'अनूषितवान् कौत्सः पाणिनिम्' 'उपशुश्रूतान् कौत्सः पाणिनिम्'। एभिरुदाहरणैः कश्चन कौत्साभिधेयः पाणिनेः शिष्यः सिद्ध्यति। जैनेन्द्रादिव्याकरणी-यवृत्तावपि गुरुशिष्यसम्प्रदायस्येत्थं वर्णनमुपलभ्यते। एकः (१) कौत्सः निरुक्ते १/१५ अत्र उद्धृतोऽस्ति (२)। गोभिले गुह्यसूत्रे (३) आपस्तम्बधर्मसूत्रे (४) आयुर्वेदीयकल्प-संहितायां(५) सामवेदीयनिदानसूत्रे(६) अपि कश्चन कौत्सोल्लेखः लभ्यते। अथर्ववेदस्य शौनकीयचतुरध्यायी अपि कौत्सकृतिरिति मन्यते(७)। एकश्चवरतन्तुशिष्यः कौत्सः रघुवंशे ५/१ श्लोके निर्दिष्टः(८)। पाणिनीयः शिष्यः एभ्यः भिन्न एव। यतः रघुवंशातिरिक्तेषु यावत्सु ग्रन्थेषु कौत्सस्य वर्णनं तत् सर्वं पाणिनेः पूर्वकालोपवर्णन तयोपलब्धेः।

डा. वर्मायाः मिथ्यालेखः डा. सत्यकामवर्मणा स्वकीये 'संस्कृतव्याकरण-स्योद्भवः विकासश्च' इति ग्रन्थस्य पृष्ठे १२६–१२८ इत्यत्र कौत्सविषये विलिखन् मीमांसकस्यनाम्नः असदभिप्रायमुद्धृत्य आलोचितमस्ति। तैः विलिख्यते मीमांसकाः एकं नवीनं सिद्धान्तम् असाधयन्। तद्रीत्या निरुक्ते (१/१५) इत्यत्र कौत्सोल्लेखः वर्तते। महाभाष्येऽपि (३/२/१०८) अत्र कौत्सः पाणिनेः शिष्यः बभूव – 'उपसेदिवान् कौत्सः पाणिनिम्'। पुनः १२७ पृष्ठे तैः विलिख्यते – अतः मीमांसकमतेन यास्कोक्तः कौत्सः पाणिनेः शिष्यः इति प्रसाधने न कोऽपि महदुपलब्धिः लप्स्यते। यदि च कौत्स इत्यभिधा नैका मन्मते च जैमिनीयसूत्रवृत्तिकारः धर्मशास्त्रे स्मृतश्चोपवर्ष एक एव। अयञ्चोपवर्षः जैमिनिनः किञ्चि वर्तते। अवन्तिसुन्दरी कथासारे वर्षोपवर्षयोः

---

१. 'जैनेन्द्र व्याक'० महानन्दिवृत्तिः २/२/८८, ९९।

२. 'यदि मन्त्रार्थप्रत्यायनर्नायानर्थको भवतीति कौत्सः'।

३. ३/१०/४।। ४– १/१९/४।। ५–पृष्ठे ११५.

६. २/१, १०।। ३/११ ।। ८/१०।। ७– पूर्व ५

८. 'कौत्सः प्रपेदे वरतन्तु शिष्यः'।

कथोल्लेखः विद्यते। परन्तु तत्र पाणिनेरुल्लेखाभावः दृश्यते। नवीनवैयाकरणैः महेश्वर एव पाणिनेः गुरुः स्वीक्रियते। परन्तु अत्र प्रमाणभावः विद्यते। कथासरित्सागरस्य कथाः ऐतिहयकदृष्ट्या न सर्वतः प्रामाणिकाः सन्ति। अत एव पाणिनेः गुरोर्नाम सन्दिग्धः वर्तते। यदि च कथासरित्सागरे वर्णितः उपवर्षोऽपि प्राच्यर्जेमिनीयवृत्तिकारः धर्मशास्त्रवर्णितः उपवर्ष एव निश्चीयते तर्हि सः पाणिनेर्गुरु इति वक्तुं शक्यते। तदानीञ्च कथासरित्सागरे वर्षोपवर्षयोः नन्दकालिकतयोपवर्णनं भ्रान्ति-मूलकं भवेत् इति स्वीकर्तव्यम् नव्यैरपि पाणिनेर्कालः नन्दात् प्राचीनतम इति स्वीक्रियते। तर्हि पाणिनीकौत्सौ तद्व्यतिरिक्तेभ्यः भिन्नावेव स्याताम्?

वस्तुतः मीमांसकस्य सन्दर्भः ध्यानेनाचितव्यः। तत्र तेन क्वापि यास्कोद्धृतः कौत्सः पाणिनेर्शिष्यः इति नोक्तम्। तेन तु, निरुक्तगोभिलगुह्यसूत्रादिग्रन्थोद्धृतः कौत्सः पाणिनेशिष्यतयोपवर्णनेन मुक्तकण्ठेन भिन्नः उक्तः। तैः स्फुटितम् रघुवंशान्यत्र यत्रापि ग्रन्थेषु कौत्सोल्लेखाः तत्सर्वे अपि पाणिनेः पूर्वभाविनः सन्ति। इत्थं स्फुटनिर्देशेऽपि कथं श्री डा. वर्मणा इदमुक्तम् - उभयमपि प्राणिनिर्शिष्यतयोपवर्णितमिति। इदं वचनम् प्रमादग्रस्तमेव।

**कात्यायनः —**

नागेशस्य लघुशब्देन्दुशेखरेणावगम्यते यत् पाणिनेस्साक्षात् शिष्यः कात्यायनो बभूव। पतञ्जलेः परम्परया पाणिनेः शिष्यत्वात् त्रिमुन्युदाहरणानि अथवा प्रकारान्तरेणोपत्तयः प्रदर्शिताः तत्र[१]। मन्मतमपीदमेव यत् वार्तिककारवररुचिः कात्यायनः पाणिनेः साक्षात् शिष्यो बभूव।

**अनेकेशिष्याः –**

काशिका ६/२/१०४ इत्यत्र पाणिनेः शिष्याः द्विविधाः विभजिताः पूर्वपाणिनीयाः, अपरपाणिनीयाश्च। महाभाष्ये १/४/१ इत्यत्र पतञ्जलिनापि विलिखितम्– उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः, केचिदाकडारादेकासंज्ञा इति, केचित् प्राक्कडारात्

१. अष्टा. २/१/१९।।

SMT. HANSA ... University of Baroda

परं कार्यम् इति। अनेनानुमीयते यत् पाणिनेः अनेकेशिष्याः बभूवुः असकृच्चानेन शब्दानुशासनं प्रपञ्चितम्।

**देशः —** पाणिनेः अपरः नाम शालातुरीयो बभूव। जैनरचनाकारेण वर्धमानेन गुणरत्नमहोदधौ अस्येयं व्युत्पतिः प्रदर्शिता शालातुरो नाम ग्रामः, सोऽभिजनोऽस्यास्तीति शालातुरीयः तत्र भवान् अर्थात्–शलातुरः ग्रामः पाणिनेः अभिजनः बभूव। पाणिनिना अष्टाध्याय्यां ४/३/९३ इत्यत्र साक्षात् शलातुरः पदं पठितं विद्यते। तस्यचाभिजनार्थे पदसिद्धिरपि दर्शिता। भोजीयसरस्वतीकण्ठाभरणे ४/३/२१० इत्यत्र शलातुरः पदं पठितम्।

**अभिजननिवासयोर्भेदः —**

महाभाष्ये ४/३/९० इत्यत्र अभिजननिवासयोर्भेदः प्रदर्शितः अभिजनो नाम यत्र पूर्वैरुषितं, निवासो नाम यत्र संप्रत्युष्यते। इत्थञ्च शलातुरः पाणिनेः पूर्वजानां वासस्थानं बभूव। पुरातत्वविदैः पश्चीमोत्तरसीमाप्रान्तस्य 'अटक' इति क्षेत्रस्य सान्निध्ये वर्तमानस्य 'लाहुरस्य' प्राचीन नाम शालातुरो बभूव। अष्टाध्याय्यां 'उदक् च विपाराः' वाहीकग्रामेभ्यश्च[१] इत्यादि सूत्रैः महाभाष्यैश्च प्रतीयते यत् पाणिनेः वाहीकदेशेन विशेषः परिचयः आसीत्। अतः पाणिनिः वाहीकदेशस्य तत्समीपस्य वा वासीति निश्चीयते।

**तपः स्थानम् —**

स्कन्दपुराणे विलिखितं यत् पाणिनिस्तताप गोपर्वते[२]। तेनैव महात्म्येन वैयाकरणेषु श्रेष्ठतमः बभूव।

**सम्पन्नता —**

पाणिनेः कुलं विपुलं सम्पन्नमासीत्। तैः स्वकीय-शब्दानुशासनाध्ययनरतानां

१. अष्टा. ४/२/११७।।

२. 'गोपर्वतमिति स्थानं शम्भोः प्रख्यापितं पुरा। यत्र पाणिनिना लेभे वैयाकरणिकाग्रथेता।। माहेश्वरखण्डान्तर्गते अरुणाचल महात्म्ये', उत्तरार्धे २/६८ पृष्ठ ६२१ मोर संस्करण (कलकत्ता)

छात्राणां कृते भोज्यं प्रबन्धितम्। इदमेव भावाभिभूतम् 'ओदनपाणिनीयाः' उदाहरणं पतञ्जलिना उदाहृतम् महाभाष्ये १/१/७३ काशिकायां ६/२/६९ इत्यत्र वामनेन पूर्वपदाद्युदात्ते 'ओदनपाणिनीयाः' इति उदाहरणं निन्दाय प्रदर्शितम्। अस्यार्थश्च 'ओदनप्रधाना पाणिनीयाः' न तु तत्र श्रद्धा।

**मृत्युः —**

पाणिनेः इतिवृत्तं न कुत्रापि किञ्चिदपि उपलभ्यते। पञ्चतन्त्रे प्रसङ्गादापतितः कस्माच्चित्प्राचीनग्रन्थाद् उद्धृतः श्लोकः यत्र पाणिनेः जैमिनेः पिङ्गलस्य च उपघातकाः उल्लिखिताः तदित्थम्—

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः
मीमांसाकृतमुन्ममाथ सहसाहस्तीमुनिं जैमिनीम्।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्
अज्ञानावृतचेतसामितिरुषां कोऽर्थस्तिरश्चां गुणैः।।[१]

अनेन ज्ञायते यत् सिंहेन पाणिनिः व्यापादितः। वैयाकरणनिकाये विद्यते इयं किम्वदन्ती यत् आचार्यपाणिनेः मृत्युः त्रयोदश्यां बभूव। मासपक्षयोः निश्चयाभावेन वैयाकरणैः प्रत्येकं त्रयोदश्यामनध्यायः विधीयते। इयं च परम्परा अस्मदध्ययनकाले काश्यादिस्थानेषु प्रचलितासीत्।

पाणिनेर्महात्म्यमनेनैव ज्ञायते यत् तस्योभयं पाणिनि पाणिनिश्च गोत्ररुपेण लोके विख्यातः। अर्थात् तदीयवंशजैः स्वकीयंप्राच्यं गोत्रं परित्यज्य इमे नाम्नी गोत्ररुपेण स्वीक्रियेते। पाणिनीयशब्दानुशासनाध्ययनेनेदं ज्ञायते यत् पाणिनिः न केवलं शब्दशास्त्रज्ञः अपि तु सकलप्राच्यवाङ्मयेषु तस्याप्रतिमगतिः आसीत्। वैदिकवाङ्-मयातिरेकं भूगोलैतिह्यमुद्राशास्त्रलोकव्यवहारादिष्वपि विशेषज्ञो बभूव। तस्य शब्दा-नुशासनं न केवलं प्राच्यभूगोलमैतिह्यञ्च प्रतिपादयति अपितु तदर्थं महान् प्रकाशस्तम्भ एव विद्यते। सः अतिप्राचीनार्वाचीनकालस्य संयोजकः महान् सेतुरस्ति। महाभाष्यकारेण पाणिनये विलिखितम् — 'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः

१. 'शाकल्यः पाणिनिर्यास्कः इति ऋगर्थपरास्त्रयः'। वेङ्कटमाधवमन्त्रार्थानुक्रमणी, ऋग्भाष्ये ७/१ आरम्भे। रामलाल कपूर ट्रस्ट संस्करण।

शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयतिस्म। तत्राशक्यं वर्णेनाप्यर्थकेन भवितुं[१] किं किं पुनरियता सूत्रेण[२]"। "पुनश्च लिखितम् सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्[३]"। अशेषशेमुषि–सम्पन्नैः पतञ्जलिभिः पाणिनीयशास्त्रमुद्दिश्य तद्विवेचनद्वारा तदीयमाहात्म्यं प्रदर्श्यते। जयादित्येन "उदक् च विपाशः[४]" सूत्रवृत्तौ लिख्यते–"महतीसूक्ष्मेक्षिका वर्तते सूत्रकारस्य"। प्रसिद्धैः चीनयात्रिभिः ह्यूनसांगैः वर्ण्यते–ऋषिणा सकल मनोयोगेन शब्दाकरैः शब्दानां चयनं चक्रे १००० सूत्रेषु च सकलव्युत्प-त्तयः विरचिताः। प्रत्येकं सूत्रं ३२ अक्षराणां विहितम्[५]। अत्रैव प्राच्यार्वाचीनसकल-ज्ञानावसानं जातम्। न च जातं शून्यं पदं किमपि[६]।

**किं कात्यायनः पतञ्जलिश्च खण्डयति पाणिनिम्?**

महाभाष्ये यत्किञ्चिदध्येतृभिः अनार्षैः कथ्यते यत् पतञ्जलिना पाणिनेः सकल-सूत्राणि खण्डितानि। अनेनैवाधारेण तैः 'यथोत्तरं मुनीनां प्रामाण्यमि' ति[७] वचनमपि रचितम्। वस्तुस्तु नव्यानाम्मतमिदमयुक्तम्। यदि च कात्यायनैः पतञ्जलिभिश्च प्रायः सर्वत्र पाणिनीयसूत्रेषु न्यूनताः लब्धाः तर्हि तत्र वार्तिकाः महाभाष्याणि च कथं तैः विहितानि। कथञ्च पतञ्जलिना इदमुक्तम् – अत्र शास्त्रे वर्णैकमप्यनर्थकं [८]अनेनावगम्यते यत् तत्र-तत्र स्थानेषु सूत्रखण्डनं न विहितं तैः परन्तु बुद्धिचातुर्येण तत्र-तत्र प्रकारान्तरेण प्रसाधिताः प्रयोगसिद्धयः।

---

१. महाभाष्ये १/१/१।। पृष्ठे ३९।
२. तुल्यताम् – 'अग्निं प्रणयति' 'अपः प्रणयन्' आदिश्रौत्प्रयोगाः। अनेनदृष्ट्या एव पतञ्जलिना 'पाणिनीयं महत् सुविहितम्' अस्योल्लेखः विहितः महाभाष्ये (४/२/६६)
३. ६/१/७७।।
४. अष्टाध्या. ४/२/७४।।
५. ह्यूनसांगलेखेनेयं भ्रान्तिः न स्यात्।
६. ह्यूनसांगवाटर्स अनुवाद १ भागे पृष्ठ २२१।।
७. महाभाष्यप्रदीपोद्योत ३/१/८०।। न हि भाष्यकारमतमतादृत्यसूत्रकारस्य कश्चनाभिप्राये वर्णयितुं युज्तये। सूत्रकारवार्तिककाराभ्यां तस्यैव प्रामाण्यदर्शनात्। तथा चाहुः – चतुष्कपञ्चकस्नानेषूत्तरोत्तरतो भाष्यकारस्यैव प्रामाण्यमिति। तन्त्रप्रदीप ७/१, १२, चातुप्रदीपभूमिका – २ पृष्ठे।
८. महाभाष्य १/१/१ तथा 'सामार्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्'। महाभाष्य ६/१/११।।

महाभाष्यस्य 'सिद्धान्तरत्नप्रकाश' टीकायां वार्तिककाराणां भाष्यकाराणां चोद्भाविताः प्रयोगाः विनापि सूत्रं प्रकारान्तरेण सूत्रोक्तोदाहरणानि साधितानीति कथ्यते। शिवरामचन्द्रेण 'न धातुलोप आर्धधातुके' (१/१/४) इत्यस्य व्याख्या इत्थं कृतम् अत्रेदमवधेयम् - लोलुवः पोपव इत्यादीनि प्रकृतसूत्रोदाहरणानि यानि वृत्तिकारैर्निर्दिष्टानि तानि सूत्रं विनापि साधयितुं शक्यन्त इत्येतावन्मात्राभिप्रायेण 'अनारम्भोवा' इत्यादिभाष्यं प्रवृतम्, न तु सर्वथा सूत्रं मास्त्विति। इदमेवसिद्धान्तं पुनः सूत्रे व्याख्यापितम् - न च सर्वत्र ...... समस्तशास्त्रस्यप्रत्याख्येयकर्तव्ये भाष्यकृता व्याकरणान्तरमेव कर्तुं युक्तं, न तु पाणिनीयप्रतिष्ठापनम्। तस्मात् स्थितमिदं सूत्रम्। (१/१/४) प्रकारान्तरेण समाधातुं वर्धमानेन गणरत्नमहोदधौ विलिख्यते। द्वितीयतृतीयेत्यादि बृहत्तन्त्रे व्यर्थम्। गणसमाश्रयणमेव श्रेयः पृष्ठः ७९१ कात्यायनेन पतञ्जलिना च प्रकारान्तरनिर्देशेन तदुत्तरवर्तिभिः चन्द्रगोमीप्रभृत्याचार्यै लाभाः प्राप्ताः इति तदुत्तरवर्तिव्याकरणग्रन्थाणां साम्येन स्फुटम्।

## ।। ॐ ।।

## ।। प्रथम परिच्छेदः ।।

## ।। आचार्यहेमचन्द्रस्य कृतित्वं व्यक्तित्वञ्च ।।

**हेमचन्द्रस्य जन्मतिथिरुत्पत्तिस्थानञ्च ::**

संस्कृतप्राकृतापभ्रंशादिसाहित्यस्य अग्रगण्यप्रणेता कलिकालसर्वज्ञत्वेन लब्धख्यातिः आचार्यहेमचन्द्रः गुर्जरप्रान्ते सुविख्यातकर्णावतीनगरीतः ६० माइल विप्रकृष्टे धन्धूकानामाख्यनगरे विक्रमसंवत् ११४४ कार्तिकपूर्णिमायाः निशि प्रादूर्बभूव। संस्कृते नगरमिदं धधूकानगरम् उत धन्धुकपुरम् इति नाम्ना प्रसिद्धं वर्तते।

**मातापितरौ तथा तयोः धर्मः ::**

आचार्यहेमचन्द्राचार्यस्य जनकः मोढवंशोद्भवः, 'चाचिङ्ग' आसीत्[1]। जननी च पाहिणी नामाभिधेयाऽभवत्। एतेषां वंशानां प्रादूर्भावो मोढेराग्रामतो जातः। अत एते मोढवंशिन उच्यन्ते। इदानीमप्यस्य वंशस्य वैश्याः 'श्रीमोढबनिये' इति पदेन भण्यन्ते।

कुलदेवी 'चामुण्डा' तथा कुलयक्षः 'गोनस' आसीत्। अतः मातृपितृभ्यां प्रस्तुतदेवताप्रीत्यर्थं पूर्वोक्तदेवतानाम् आद्यन्ताक्षरं संयोज्य तोकस्याभिधेय 'चाङ्गदेव' अकारि। माता चास्य पाहिणी एवं मातुलो नेमिनागः जैनधर्मावलम्बिन आसीत्[2]। किन्त्वस्य जनकः मिथ्यात्वीपदेन निगदितो जैनशास्त्रकारैः। प्रबन्धचिन्तामणिग्रन्थानुसारेण अयं शैवधर्मी प्रतीयते। कुलदेवीचामुण्डायाः नाम अपि असावेव प्रगटयति। परिवारश्चास्य पार्वतीपरमेश्वरयोरुपासक आसीत्। गुर्जरे एकादशशताब्द्यां शैवमतानां प्राबल्यमासीत्। यतो हि चौलुक्यराज्ञां काले गुर्जरे प्रतिग्रामं सुन्दरशिवालयाः सुशोभिता

१. द्रष्टव्यम् – प्र.च. स्य हेमचन्द्र सूरि प्रबन्ध श्लो. - ११, १२।

२. एकदा नेमिनागनामा श्रावकः समुत्थाय श्रीदेवचन्द्रसूरीन् जगौ...दीक्षां याचते। प्र.को.पृ. ४७।

आसन्। सन्ध्यावेलायां जायमानैः शङ्खध्वनिभिः घण्टनादैश्च अखिलवायुमण्डलं शब्दायमानं समभवत्।

पाहिण्याः जैनधर्मः चाचिंगस्य च शैवधर्मः आसीत्, तथापि नानयोः सहवासे काचिदापत्तिरासीत्। दक्षिणप्रान्ते गुर्जरप्रान्ते च तादृशाः नैके परिवारा आसन् ययोः जम्पत्योः धर्मः पृथक्-पृथक् बभूव।

**आचार्यहेमचन्द्रस्य शैशवम् —**

प्रतिभासम्पन्नः शिशुचाङ्गदेवो बाल्यकाले एव निजभवितव्यतायाः दर्शनं कारितवान्। एकदा श्रीदेवचन्द्राचार्य अणहिलपुर (पाटण) तः यात्राप्रसङ्गे धन्धुकां प्राप, तत्र च मोढवंशीयानां 'वसही' जैनमन्दिरे, देवदर्शनार्थं समागतवान्। तस्मिन् समये अष्टवर्षीयः शिशुचाङ्गदेवः स्वसखिभी रममाणस्तत्र समागतः। चाञ्चल्येन देवेन्द्राचार्यस्य पीठे कुशलता पूर्वकमारुढवान्। एतस्य अलौकिकानि शुभलक्षणानि दृष्ट्वा आचार्य उवाच—यदि क्षत्रियकूलोत्पन्नोऽयं बालकः तर्हि नूनं सार्वभौमराजा भविता। ब्राह्मणवैश्यकुलोत्पन्नः स्यात् तर्हि महामात्यो भवति। यदि च प्रवण्यां ग्रहीष्यति तर्हि युगप्रधानम् इव निश्चप्रचम् अमुस्मिन् युगे जैनधर्मस्य प्रथद्रष्टा भविष्यति। चाङ्गदेवस्य सहजसाहसं शरीरसौष्ठवम्, चेष्टा, प्रतिभा एवं भव्यतादिगुणाः आचार्यचितचोरकाः अभवन्। सानुरागं बालकप्राप्त्यर्थं स्वयं मुनिः नगराधिकारिभिः चाचिङ्गस्ये गृहं वव्राज। तदा चाचिङ्गः कार्यवशात् बहिर्गतवान् आसीत्। अतः विवेकसम्पन्ना भार्या एव समागतानां स्वागतसत्कारं कृतवती।

भिक्षुदेवेन्द्रो वार्तालापप्रसङ्गे चाङ्गदेवम् अयाचीत्। पुत्रयाचनायाः वार्तां मुनिमुखेन आकर्ण्य स्वां धन्यां मन्यमाना सा वि तापसप्रस्तावं सहर्षं शिरोधार्य निषाऽधिकारसी-मामवलोक्य सा अनिच्छन्नपि जगाद—मुने! पुत्रोपरि पित्रोः तुल्याधिकारौ वर्तते। पतिदेवः सम्प्रति बहिर्गतवान् अस्ति। स च शैवधर्मी वर्तते। अत एकाक्यहं पुत्रदा-तुमसमर्था। पाहिण्याः कथनमिदं श्रुत्वा प्रतिष्ठितवणिजः उक्तवन्तः यत् त्वम् अधुना स्वीयाधिकारेण स्वसुनुं गुरवे ददातु। यदा चाचिङ्गः समागमिष्यति तदा तस्यापि स्वीकृतिं नेष्यामः।

पाहिणी सकलसमुदायस्य उपस्थितौ प्रस्तावोऽयम् उरीकृत्य निजपुत्ररत्नम् आचार्याय प्रदत्तवती। आचार्ययोगभविष्णुः बालं प्राप्य प्रसन्नचेतसा तं पप्रच्छ, त्वं मम अन्तेवासित्वम् अङ्गीकरिष्यति? चाङ्गदेवः 'अवश्यं स्वीकरिष्ये' उत्तरमिदं श्रुत्वा मुनिर्मुमोद। मनेर्मनसि चिन्ता आसीत् चाचिङ्गस्य। अतः आचार्यः चाङ्गदेवं नीत्वा कर्णावतीं जग्मिवान्। तत्र अमात्योदयनस्य समीपे स्थापयामास। उदयनस्तस्मिन् काले जैनसङ्घस्य सर्वाधिकप्रभावी श्रावकः आसीत्। अतः अस्य संरक्षणे चाचिङ्गं प्रस्थाप्य निश्चिन्तयामास।

**आचार्यहेमचन्द्रस्य कृतित्वं व्यक्तित्वञ्च –**

द्वादशशताब्द्यां गुर्जरप्रान्ते सामाजिकसाहित्यिकसांस्कृतिकराजनीतिकेतिहासस्य आचार्यहेमचन्द्रः युगान्तकारी नवयुगस्थापकत्वेन सह प्रादूर्बभूव।

पूर्वकथायां चाचिङ्गः यदा ग्रामान्तरतः प्रत्यागच्छत् तदा निजपुत्रसम्बन्धी इतिवृत्तं श्रुत्वा दुःखान्वितोऽनुक्षणं कर्णावतीं चचाल। तत्र आचार्यसमीपं गत्वा सर्वं पप्रच्छ। चतुराचार्यः मोहनिवृत्यर्थं तं समुपदिदेशः, तस्मिन् समये अमात्योदयनोऽपि समागतवान्। आचार्येण आहूत उदयनः चातुर्यपूर्वकं वार्तालापं कृत्वा श्रद्धया स्वीयगृहं निन्ये। तत्र सत्कारपूर्वकं भोजनम् अकारयत्। तदनु तस्य अङ्के चाङ्गदेवम् अन्यसत्। तेनैव सह लक्षत्रयरुप्यकाणि एवञ्च बहुमूल्यानि वस्तूनि तस्मै प्रददौ इति जनवादः श्रूयते। पितुः चाङ्गदेवस्य आचार्योपदेशेनैव किञ्चिद् मनः परिवर्तनं जातम् एवञ्च सम्मानमिदं सम्प्राप्य स्नेहविह्वलो भूत्वा बभाण – भवन्तस्तु लक्षत्रयं दत्वा उदारताया छद्मे कृपणत्वं प्रगटयति। अमूल्यो मत्पुत्रः अस्य बालस्य मूल्यरुपेण भक्तिरेव समर्पयतु। भवद्-द्रव्यस्य शिवनिर्माल्यवत् स्पर्शमपि न कर्तुं शक्नोमि।

चाचिङ्गस्य कथनमिदमाकर्ण्य उदयनोऽबोचत्-भवन्तः निजपुत्रं मह्यं दास्यन्ति न तेन कोऽपि अस्याभ्युदयो भविष्यति। एतं बालकम् आचार्याय समर्पयतु, तदा सः गुरुपदं सम्प्राप्य बालेन्दुसदृशं त्रिभुवनपूज्यो भविता। अतः विचारयित्वा उत्तरं ददातु। भवन्तः पुत्रहितैषिणः सन्ति तथा च साहित्यसंस्कृतिरक्षकाः। अमात्यस्य इमानि वचनानि श्रुत्वा चाचिङ्गः प्रोवाच-'भवतां वचनानि एव प्रमाणम् अस्ति' मया स्वपुत्रः आचार्याय दीयते। आचार्यः एतानि वचनानि श्रुत्वा हर्षान्वितोऽभवत्।

तदनु अमात्योदयनस्य सहयोगेन चाचिंगः चाङ्गदेवस्य दीक्षामहोत्सवमकारयत्। चतुर्विधसङ्घसम्मुखे देवेन्द्राचार्यः तीर्थस्तम्भस्य विक्रमसंवत्-११५४ माघमासस्य शुक्लपक्षे चतुर्दश्यां शनिवासरे सकलविधिपुरस्सरं समपादयत्। एवञ्च चाङ्गदेवस्य दीक्षानाम सोमचन्द्रः समुदघोषयत्।

हेमचन्द्रस्य शैशवकालीनः पूर्वोक्त इतिवृत्तम् प्रबन्धचिन्तामणिग्रन्थानुसारेण विलिखितम्[१]। ऐतिहासिकप्रबन्धकाव्ये कुमारपालप्रबन्धे, चन्द्रप्रभसूरिविरचिते प्रभावकचरिते तथा च राजशेखरसूरिविरचिते प्रबन्धकोशो वृत्तमिदं भिन्नरुपेण समुपलभ्यते। प्रभावचरिते लिखितं यत् पाहिणी स्वप्नमद्राक्षीत्। सा निजस्वप्नम् आचार्याय जगाद – स्वप्नावस्थायां चिन्तामणिरत्नं परामर्शदात्रे आध्यात्मिकगुरवे समर्पितम्। देवेन्द्राचार्यः इदं श्रुत्वा स्वप्नविषये विश्लेषणं चकार।

एकः पुत्ररत्नः भविष्यति स च जैनसिद्धान्तानां सर्वत्र प्रचारप्रसारकृद् भविता।

यदा चाङ्गदेवः पञ्चवर्षीयोऽभूत् तदा मात्रा सह देवमन्दिरं सञ्जगाम। माता यदा पूजामग्ना आसीत् तदा पुत्रः आचार्यदेवेन्द्रस्य पीठे आरुढवान्। आचार्यः पाहिणीं स्वप्नं सस्मार एवञ्च तां समादिशत् यत् स्वीयसुतं शिष्यरुपेण समर्पयेत्। पाहिणी निजविषये पतिमादाय समस्यां विज्ञापितवती। एतच्छ्रुत्वा आचार्यः तृष्णीं बभूव। एतद् दृष्ट्वा अनिच्छन्नपि आचार्याय अददत्। तत्पश्चाद् देवेन्द्रः स्वेनसह चाङ्गदेवं स्तम्भतीर्थम् अनैषीत्। सम्प्रति स्तम्भतीर्थः 'काम्बे' नाम्ना प्रसिद्धं वर्तते। तत्र दीक्षासंस्कारः विक्रमसंवत् ११५० माघशुक्लचतुर्दस्यां मन्दवासरे सम्पन्नोऽभूत्।

ज्योतिषदृष्ट्या यदि वयं कालगणनां कुर्महे चेत् माघशुक्लचतुर्दशी शनिवासरः विक्रमसंवत् ११५४ मध्ये न भवति अपितु वि.स.११५० मध्ये अस्ति। अतः प्रभावचरितस्य उपयुक्तं परिगणनं भ्रान्तिमूलकं प्रतीयते।

शैशवकालस्य सम्बन्धे एका तृतीया कथा समुपलभ्यते। एषा कथा न तु प्रभावकचरिते मिलति न च मेरुतुङ्गस्य प्रबन्धचिन्तामणिमध्ये। अस्याः कथायाः लेखकः राजशेखरसूरिः वर्तते। अनेन स्वीयप्रबन्धकोशे उट्टङ्कितं यत् आचार्यदेवेन्द्रस्य

१. प्र.च. पृष्ठसंख्या – २९८ श्लो.२७ तः ४५।

धर्मसभायां 'नेमिनाग' नामकश्रावकः उत्थाय निगदितवान् अयं मम भागिनेयो भवतां देशनां श्रुत्वा प्रबुद्धो भूत्वा दीक्षां ययाचे। यदा अयं गर्भे आसीत् तदा मम भगिनी स्वप्ने आम्रवृक्षं ददर्श। यः आम्रः स्थानान्तरे बहुफलवान् अभूत्। इमानि वचनानि श्रुत्वा आचार्याः प्रोक्तवन्तः अस्य पितुः स्वीकृतिरावश्यकी। तदनन्तरं मातुलो नेमिनागः निजभगिन्याः ओकसि आगत्य व्रतयाचनां चर्चयामास। मातापित्रोः अस्वीकृतौ सत्यपि चाङ्गदेवः दीक्षामाबभार।

कुमारपालप्रबन्धे लिखितम्–एकदा पाहिणी आचार्यदेवचन्द्रं प्राह यत् स्वप्ने चिन्तामणिरत्नं प्राप्तवत्यहम्, रत्नं मया भवद्भ्यः समदायि। आचार्या ऊचुः अस्य इदमेव फलं यत् त्वं एकः चिन्तामणिसदृशः पुत्रः जनिष्यति। स च पुत्रः गुरुं निवेदयिष्यति तदा सूरिराज भविता, न तु गृहस्थः। कालान्तरे चाङ्गदेवः गुरोः आसने आरुढवान् तदा आचार्यः अवोचत्–पश्य पाहिणि! सुश्राविके! त्वया यस्य स्वप्नस्य चर्चा अकारि तत्फलं सम्मुखे समागतम्, तदनु देवचन्द्रः ससङ्घं चाङ्गदेवस्य याचनार्थं पाहिणीगृहं प्राप। पाहिणी च प्रतिषेधे सत्यपि सर्वपरिसह्य स्वसुतम् आचार्याय दत्तवती।

अत्र त्रयाणां वृत्तानाम् अध्ययनाद् एतत्प्रतीयते यत् चन्द्रप्रभसूरिविरचिताया कथा प्रभावकचरिते समुपलभ्यते तस्यां कथायां चाङ्गदेवस्य दीक्षाकालः संवत् ११५० माघशुक्लचतुर्दश्यां मन्दवासरे विलिखितः एवं ज्योतिषकालदृष्ट्या एषा तिथिः वासरश्च चतुर्वर्षानन्तरं ११५४ वर्षे आगच्छति। अतः अस्यां कथायां न किमपि सत्यता प्रतीयते।

## ।। हेमचन्द्रस्य शिक्षा एवं सूरिपदम् ।।

दीक्षानन्तरं सोमचन्द्रस्य विद्याध्ययनं प्रारब्धम्। तर्कग्रन्थाः एवञ्च साहित्यग्रन्थाः अल्पकालावधावेव हस्तामलकवज्ज्ञाताः। देवचन्द्रसूरिः सप्तवर्षाणि अष्टौ मासाः एकस्थानतः अपरस्थानं परिबभ्राम एवं चत्वारः मासाः कोपि सद्गृहस्थस्य ओकसि व्यतीतवान्। सोमचन्द्रोऽपि तेनैव सह आसीत्। अतः अल्पवयस्येवायं देशदेशान्तराणां

परिभ्रमणेन स्वीयःशास्त्रीयज्ञानमिव व्यावहारिकज्ञानं एचितवान्। अस्मिन् विषये नागपुरे श्रेष्ठिधनदस्यगृहे वासः तथा देवेन्द्रसूरिणा एवं मलयगिरिणा सह गौडदेशस्य खिल्लरग्रामे वासः एवञ्च स्वतः काश्मीरगमनमुपलभ्यते। एकविंशतितमे वर्षे वयसि सूरिपदं प्राप्य हेमचन्द्रेण साहित्यस्य एवं समाजसेवायाः आवासः आरब्धः। एतस्य-नूत्नाचार्यस्य विद्वत्ता, तेजः प्रभावादिस्पृहणीयगुणाः प्रेक्षावतां सहजतया एव चितचोरकाः बभूवुः।

हेमचन्द्रेण स्वीयगुरोः नामोच्चारः न कुत्रापि कृतः। प्रभावकचरितस्य कुमारपालप्रबन्धस्य चोल्लेखेन प्रतीयते यत् हेमचन्द्रस्य गुरुः देवचन्द्र एव आसीत्। देवचन्द्राचार्यः सुचीरुपेण प्राप्यते, किन्तु हेमचन्द्रम् अन्यकश्चिद् विद्वान् पाठितवान् इत्यत्र तु नास्ति केषामपि वेमत्यम्। इति तु सत्यं वर्तते यत् हेमचन्द्रस्य किञ्चित्कालानन्तरं स्वगुरुणा सह विग्रहो जातः। अस्मातकारणादेव स्वीयकृतौ कुत्रापि गुरोः नामसंकीर्तनम् नास्ति। मेरुतुंगेन निजाख्याने लिखितं वर्तते। अनेन तयोः गुरुशिष्य-सम्बन्धो ज्ञायते। तत्र लिखितं यत् देवचन्द्रः स्वं शिष्यं स्वर्णनिर्माणस्य कला न शिक्षितवान्, यतो हि अन्यसरलं विज्ञानं नाचीतवान्। अतः स्वर्णगुटिकायाः शिक्षादानं अनुचितं ज्ञातवान्। भवेत् प्रोक्तघटना एव गुरुशिष्ययोर्वैमनसस्य हेतु र्जाता।

प्रभावकचरितेन ज्ञायते एतद् हेमचन्द्रः विद्याधिष्ठात्रीं समाराधितुं कश्मीरं प्रति यात्रां प्रारब्धवान्। ते आभिः साधनाभिः सकलनिजप्रतिवादीन् पराजेतुं समर्थो भविष्यति। वाग्देव्याः इमां वाणीमाकर्ण्य हेमचन्द्रो हर्षान्वितो जातः। स च स्वीयां अग्रिमां यात्राम् अवरुध्य प्रत्येत्[१]।

वृत्तान्तमिदं सत्यं प्रतीयते। अस्य पुष्टिः अभिधानचिन्तामणावपि विहितास्ति। भारतदेशे बहवः विद्वांसः मन्त्राणां साधनया ज्ञानं अधिगतवन्तः। नैषधकारश्रीहर्षस्य तथा कालिदासस्य विषये इदं श्रूयते एव।

१. विशिष्टाअध्ययनाय – Life of Hemchandra (द्वितीय अध्याय) तथा काव्यानुशासनस्य आङ्लप्रस्तावना पृ. CC/ xvi - cc/xix.

## आचार्यहेमचन्द्रः सिद्धराजजयसिंहश्च ::-

आचार्यहेमचन्द्रस्य गुर्जरमहाराजजयसिंहेन सार्द्धं प्रथममेलनं कदा कुत्र जातमस्मिन् विषये न किमपि पुष्टप्रमाणं उपलभ्यते। उच्यते–एकस्मिन् दिने सिद्धराजजयसिंहः हस्त्युपरि आरुह्य अणहिलपुर(पाटण)स्य राजमार्गे गच्छन् आसीत्। तस्य दृष्टौ इर्यापथशुद्धिपूर्वकं गच्छन् हेमचन्द्र आगतः। शान्तगम्भीरमुद्रां मुनेर्दृष्ट्वा राजा प्रभावितो जातः। एवञ्च साभिवादनं राजप्रासादे (राज्यसभायां) दर्शनार्थं आमन्त्रितवान्। आ. हेमचन्द्रः यथावसरं राज्यसभायां आजगाम। हेमचन्द्रस्य पाण्डित्यं दूरदर्शितां सर्वधर्मसमत्वं दृष्ट्वा राजा प्रमुदितो जातः। सभायां अस्य सम्मानं कीर्तिश्च उत्तरोत्तरं समैधत।

सिद्धराजः धर्मचर्चायां रसिकः आसीत्। एकदा सः हेमचन्द्रं निगदितवान् यत् वयं स्व–स्व दर्शनग्रन्थे स्वीयमतस्य स्तुतिं अपरस्य च निन्दां श्रृण्मः। भवन्तः प्राज्ञाः, अतः संसारसागरपारावारीणो धर्मः कः? इति दर्शयन्तु।

शेखपुरे शम्बनामक एकः श्रेष्ठी एवं यशोमतिनाम्नः तस्य गेहिनी प्रतिवसतिस्म। भर्ता अप्रसन्नो भूत्वा अपरां यशोमतिः स्वपत्युः व्यवहारं दृष्ट्वा कष्टान्विता जाता उपायञ्च चिन्तयामास।

एकदा कश्चित्कलाकारः गौडप्रदेशतः समागतः। यशोमतिः पूर्णश्रद्धाभक्त्या तं सेवयामास। एवञ्च तस्माद् दीव्यौषधिं जग्राह। तस्याः सेवनेन पुरुषः पशुर्भवति। यशोमतिः क्रोधवशात् भोजने इमामौषधिं निक्षिप्य भोजनम् अकृत। औषधप्रभावेण तस्याः पतिः सद्यो बलिवर्दो जातः। अनन्तरं सा दुःखान्विता सन् स्वाल्पबुद्धौ रुरोद। सा चिन्तितवती एनं कथं कलीवर्दतः निजरुपं परिवर्तयेयम्। लज्जिता शोकान्विताचसा निकटवर्तिवने वृक्षस्याधः भूमौ बलिवर्दस्वरुपं स्व-स्वामिनं चारयतिस्मः विलपतिस्म च। दैवयोगेन एकस्मिन् दिने उमामहेश्वरौ विमानमारुह्य आकाशमार्गेण ततः गच्छन् आसीत्। पार्वती एतस्याः अश्रुविलापं आकर्ण्य शंकरं प्रोवाच। हे स्वामिन्! अस्यां नगच्छायायां एतादृशी दीव्यौषधिः वर्ततेः। यस्याः सेवनेन अयं पुनः पुरुषत्वं प्राप्स्यति। यशोमतिः इमां वाणीं श्रुतवती तत्क्षणे वृक्षच्छायां रेखाङ्कितवती।

तदनु तृणरुपं छायाभागं छिन्नवती। तृणाग्रभागं त्रोटित्वा गविमुखे दत्तवती। सशस्यं औषधिभक्षणं कृत्वा पूर्वरुपं प्राप्तवान् बलिवर्दः।

आचार्यः हेमचन्द्रः अस्याः कथायाः उपसंहारे प्रोवाच—हे राजन्! यथा नाना रास्यानि लब्ध्वापि यशोमतिः औषधिं नान्वेषितवती तथैव अमुस्मिञ्जगति नेकैः धर्मैः सत्यधर्मः तिरोहितो वर्तते। किन्तु! निखिलधर्माणां सेवनेन दीव्यौषधेः प्राप्तिवत् पुरुषः यदा-कदापि शुद्धधर्मं प्राप्नोत्येव। सत्यदयाऽचौर्यब्रह्मचेर्या परिग्रहाणां सेवनेन विना अवरोधेन सकलधर्माः आराध्यन्ते जनैः। आचार्यस्य उत्तरमिदं श्रुत्वा सर्वे प्रभाविताः जाताः।

हेमचन्द्रसिद्धराजयोर्प्रथममेलनविषये एकोल्लेखः उपलभ्यते यत् जयसिंहः एकदा करिणमारुह्य उषसि नगरभ्रमणाय प्राचलत् पथि आपणके स्थितं दृष्ट्वा किमपि भणन्तु इति निवेदितवान्। सूरिः तस्य प्रशंसायां निम्नोक्तश्लोकं प्राह—

कारय प्रसरं सिद्धहस्तिराजमशङ्कितम्।
त्रस्यन्तु दिग्गजाः किं तैः भूस्त्वयैवोद्धृताः।।

उच्यते यत् इमं श्लोकं आकर्ण्य जयसिंहः प्रसन्नो जातः। एवं निजराजसभायां सूरिम् आहूतवान्। मालवराज्यं विजित्य भूपाय आशीर्वाद दातुं सर्वे धर्माधिकारिणः एकत्रीभूताः तदा जैनधर्मस्य प्रतिनिधित्वं हेमचन्द्रः आवहत। मन्ये यत् मेलनमिदं विक्रमसंवत्-११९१-११९२ मध्ये जातः।

**सिद्धहेमशब्दानुशासनस्य प्रादूर्भावः –**

श्रूयते किम्वदन्त्येका यत - हेमचन्द्रेणपठितपद्यस्य अर्थचातुर्येण सभायां सर्वे सुधियः अचित्रीयन्त सूरेश्च प्रशंसापराः अभवन्। अस्मिन्नवसरे कतिपयब्राह्मणाः इर्ष्यादिवशात् उक्तवन्तः अस्माकं शब्दानुशासनादि शास्त्राणि पठित्वा भवान् विद्वान् अभूत्। तत्र किं आश्चर्यम्? राजा सूरिं प्रोवाच किमिदं सत्यम्? आचार्यः प्राह—वयंतु जेनेन्द्र व्याकरणं भणामः। महावीरः इन्द्रसमक्षं इदं व्याकरणं व्याख्यातवान्। एषा चर्चा तु प्राचीनकालस्य। राजा अवदत्-एतां चर्चां परित्यज्य नूत्नं व्याकरणं सांगोपांगरुपेण रचयितुं कः समर्थः?। राज्ञः इदं वचनं श्रुत्वा आचार्यहेमचन्द्रः अभणत्-

यदि भूभर्ता सहायकृद् भविष्यति तर्हि अल्पकालावधावेव नवीनं व्याकरणं रचयिष्यामि। अधिपः सहाय्यस्य वचनं दत्त्वा अनेकानि व्याकृतिग्रन्थानि आनायितवान्। हेमचन्द्रेण समेषां व्याकरणग्रन्थानां आलोडनं कृत्वा व्याकरणं व्यरचि। [१]एका अपराऽपि कथा अस्मिन् विषये प्रचलिताऽस्ति। सिद्धराजजयसिंहः अवन्त्याः पुस्तकालयात् समानीतानि पुस्तकानि-निरीक्षमाणः आसीत्। तदा दृष्टौ सरस्वतीकण्ठाभरणं नामकं पुस्तकं आगतम्। राजो सेवकाय अपृच्छत् किमिदम्? सेवकाः अवादीषुः शब्दानुशासनमिदम्। अस्य रचना स्वयं राज्ञा भोजेन कृता। एतेन अन्यानि शब्दालंकारादीनि अनेकानि शास्त्राणि-निरमायि। भोजः यथा दाता आसीत् तथा उद्भट्टविद्वान् अप्यासीत्। इमानि वचनानि श्रुत्वा राज्ञः जयसिंहस्य मनसि साहित्यशास्त्रे अपरदेशस्य पारतन्त्र्यमाजगाम। तेन तत्रोपस्थितानां विदुषामुपरि दृष्टिपातं कृत्वा जगाद किं अस्माकं राज्ये एतादृशस्य शब्दशास्त्रस्य निर्माता नास्ति। किं गुर्जरदेशः अन्यराज्यनिर्मित-शब्दशास्त्रस्योपरि एव सदाऽऽश्रितौ भविष्यति। यद् राज्यमन्यसाहित्यस्य संस्कृतेश्चाऽऽश्रयणं कुरुते सः स्वतन्त्रोऽपि परतन्त्र एवास्ते। वचनानीमानि गम्भीरवातावरणमसृजत। सर्वे सुधियः शब्दशास्त्रस्य रचयितारं समर्थविद्वांसमन्विष्यमाणा आसन्। प्रान्ते सर्वेषां दृष्टिः आचार्यहेमचन्द्रे स्थिराऽभवत्। अतः अधिपेन हेमचन्द्रसूरिः नूतनरचनाय न्यवेदि। उक्तञ्च—

यशो मम तवख्यातिः, पुण्यं च मुनिनायक।
विश्वलोकोपकाराय कुरु व्याकरणं नवम्।।

राज्ञः प्रस्तावमुररीकृत्य काश्मीरतः प्रसिद्धानि सर्वाणि व्याकरणशास्त्राणि राज्ञाऽऽनायितवान्। आचार्यैः समेषां व्याकृतिग्रन्थानां सूक्ष्मेक्षिकया विलोडनं प्रकृत्य सपादलक्षश्लोकसंख्यात्मकं पञ्चाङ्गव्याकरणं निरमायि। राज्ञः स्वस्य च नाम संयोज्य शब्दराशेः नामकरणं सिद्धहेमशब्दानुशासनमकारि। इत्यपराऽपि कथा प्रसिद्धा।

**हेमचन्द्रस्य कृतित्व-परिचयः**

हेमचन्द्रेण त्रिकोटिसंख्यात्मकानि ग्रन्थानि व्यरचि। अत्र यदि वयं अतिशयोक्ति

१. सिद्धहेममध्यमवृति – प्रस्तावना पृ. ११

स्वीकुर्मः तर्हि शताधिकानि ग्रन्थानि तु भविष्यत्येव। जैना एनं कलिकालसर्वज्ञस्योपाधिं दत्तवन्तः। अस्य रचनां दृष्ट्वा स्पष्टतया प्रतीयते यत् आचार्यहेमचन्द्रः स्वसमयस्य अद्वितीयविद्वान् आसीत्। संस्कृतवाङ्मयस्येतिहासे अन्यस्य कस्यापि एकस्यैव ग्रन्थकारस्य निखिलक्षेत्रे एतावत्प्रमाणानि ग्रन्थानि नोपलभ्यन्ते। प्रधानत्वेनास्य कृत्यस्तु-

**(१) पुराणम् –**

अस्मिन् ग्रन्थे काव्यशैलीद्वारा जैनधर्मस्य चतुर्विंशति-तिर्थकराणां द्वादश चक्रवर्तीणाम्, नवनारायणानां नवप्रतिनारायणानां नवप्रतिनारायणानां नवबल-देवस्य एवंरीत्या त्रिषष्टिप्रमुखपुरुषाणां चरित्रवर्णनं अस्मिन् ग्रन्थे वर्तते। ग्रन्थोऽयं पुराणदृष्ट्या काव्यकलादृष्ट्या च उत्कृष्ट आस्ते। परिशिष्टपर्वः भारतस्य प्राचीनेतिहासगवेषणायापि सहायकृद् वर्तते।

**(२) काव्यम् –**

कुमारपालचरितम्। द्वाश्रयकाव्यमप्येनं भण्यते। अस्य नामकरणविषये कारणद्वयं सम्भाव्यतेयत अस्याः कृतेरुद्देश्यम् तत्कालीनराज्ञः कुमारपालस्य चरित्रवर्णनम् अपरञ्च संस्कृतप्राकृतव्याकरणसूत्राणां यथाक्रममुदाहरणानां श्लोके निबन्धनम्। कठिनतममैतत्कार्यं स्वीयवैदुष्यं प्रतिपादयति। इदन्तु सहृदयाः काव्यरसिकाः जानन्त्येव।

**(३) व्याकरणम् (शब्दानुशासनम्) –**

ग्रन्थोऽयं अष्टाध्यायिप्रमाणको वर्तते। सप्तसु अध्यायेषु संस्कृतशब्दानां भाषानाञ्च परिनिष्ठितत्वं प्रत्यपादि। अष्टमाध्याये प्राकृतभाषायाः साधुत्वमास्ते। संस्कृतभाषायाः प्राकृतभाषायाः परिज्ञानाय प्रामाणिकत्वेन संक्षिप्तग्रन्थो वर्तते।

**(४) कोषः –**

अस्य चत्वारः प्रसिद्धाः कोषाः सन्ति। -१- अभिधान चिन्तामणिः, -२- अनेकार्थसंग्रहः, -३- निघण्टुः, -४- देशीनाममाला। अभिधानकोशे अमरकोषवत्। एकवस्तुनः अनेकार्थनिरुपणं प्रतिपादितं वर्तते। निघण्टुकोषे

वनस्पतिशास्त्रस्य शब्दानां संग्रहो भवति। चतुर्थकोशे संस्कृतप्राकृतव्याकरणेयेशब्दाः न सिध्यन्ते देशी नाम्ना च व्यवह्रीयते तेषां संग्रहोऽस्ति। प्राकृतापभ्रंशाचुनिकभाषानाम् अध्ययनाद् सहायकृद् अस्ति।

## (५) अलङ्कारः –

काव्यानुशासनम्। ग्रन्थोऽयं स्वविषये साङ्गोपाङ्गरुपेण वर्तते। ग्रन्थकारेण निजनिर्मित सूत्राणि एकञ्च विवेकचूडामणिनाम्ना तस्य वृतिः विवेकनाम्ना च तस्याः टीका व्यरचि। अत्र काव्यप्रकाशकारमम्मटापेक्षया काव्यस्य प्रयोजनहेत्वर्थालंकारगुणदोषध्वन्यादिसिद्धान्तानांमुपरि हेमचन्द्रेण विस्तृतं गहनञ्चाध्ययनं प्रस्तुतवान्। हृद्यं साधर्म्यमुपमा लक्षणेदं कं सहृदयंमानन्दं न जनयिष्यति।

## (६) छन्दश्शास्त्रम् –

(छन्दोऽनुशासनम्) अत्र संस्कृतप्राकृतापभ्रंशसाहित्यस्य छन्दांसि निरुपितानि सन्ति। मूलग्रन्थः सूत्रात्मको वर्तते। आचार्यनिर्मिता वृत्तिरपि वर्तते। अनेन छन्दसामुदाहरणानि मौलिकरुपेण विलिखितानि। अत्र रसगंधाधरवत् सर्वं आचार्यरचितमेवास्ति।

## (७) न्यायशास्त्रम् –

प्रमाणमीमांसा। अमुस्मिन् शास्त्रे प्रमाण प्रमेय पदार्थस्य सविस्तरं विवेचनं वर्तते। अनेकान्तवादः प्रमाणानि पारमार्थिकप्रत्यक्षस्य तात्विकत्वम्, इन्द्रियज्ञानस्यव्यापारक्रमः, परोक्षस्य प्रकाराः अनुमानावयवानां प्रायोगिकव्यवस्था, कथायाः स्वरुपम्, निग्रहस्थानस्यजयपराजयव्यवस्था, प्रमेयप्रमातुश्च स्वरुपम् एवञ्च सर्वज्ञत्वस्य समर्थनादयः मौलिकपदार्थाः विस्तारिताः सन्ति।

## (८) योगशास्त्रम् –

यौगिकानां कृते परमोपयोगी ग्रन्थः आचार्येण विलिखितः। अस्मिन् शास्त्रे जैनधर्मस्यशब्दावल्याः प्रयोगो वर्तते। अस्य शैली पतञ्जलेः योगशास्त्रानुसारमेव वर्तते। विषयवर्णनक्रमयोः मौलिकत्वं भिन्नत्वञ्चास्ति।

## (९) स्तोत्रम् –

द्वात्रिंशिकाः। स्तोत्रसाहित्यदृष्ट्या हेमचन्द्रस्य उत्तमाः कृतयः सन्ति। वितराग-महावीरंस्तोत्रांवपि उत्कृष्टौ स्तः।

## हेमचन्द्रस्य व्यक्तित्वमवसानञ्च –

हेमचन्द्रस्य व्यक्तित्वं बहुमुखी आसीत्। तस्मिन् साधुत्वम्, शास्त्रीयवैदुष्यम्, कृतित्वादि नैकेगुणाः हेम्न्यपि सुवासजनका आसन्। एषां चारित्र्ये अनुपमस्वर्णिम-प्रकाशस्य कान्तिरासीत्। यस्य प्रभावेण सिद्धराजजयसिंहकुमारपालादयः भूपतयः समाकृष्टाः अभूवन्। आचार्याः विश्वबन्धुत्वस्य पोषकाः निजयुगस्य च न प्रकाशस्तम्भ अपि तु युगान्तरस्य प्रकाशस्तम्भो वर्तते। अस्य युगपुरुषस्य सकलवाङ्मयशास्त्रं समाजश्च सर्वदा नतशिरसा स्मरणं करिष्यति।

कुमारपालः ३० वर्षम् ८ मासान् २७ दिनानि च राज्यं कृत्वा सन् ११७४ मध्ये सुरपुरमलभत। अस्य षण्मासपूर्वम् आचार्यश्रीहेमचन्द्रः देहिकलीलां परिसमाप्य परमपदमप्राप्नोत्। आचार्यस्य वियोगं राजा दीर्घकालं न परिसोढवान्। जनानां भस्मविलेपनेन हेमचन्द्रस्यान्त्येष्टिक्रियाभूमौ बृहद्गर्तोऽभूत्। स गर्तः हेमखाड नाम्ना प्रसिद्धोऽभूत्। इति।।